ॐ नमः परमात्मने ।

श्रीसन्न्यासगीता ।

भाषानुवाद और टिप्पणी सहित ।

भारतधर्ममहामण्डल के शास्त्रप्रकाश
विभाग द्वारा श्रीविश्वनाथ अन्नपूर्णा-
दानभंडार के लिये प्रकाशित ।

काशी

बी. एल्. पावगी द्वारा
हितचिन्तक प्रेस, रामघाट, में मुद्रित ।

श्रीविश्वनाथो जयति ।

श्रीसन्न्यास गीता

का

विज्ञापन ।

वैदिक सिद्धान्तों की सारभूत अनेक गीताएं पूज्यपाद महर्षियोंने जगत् के कल्याणर्थ प्रकाशित की हैं । श्रीमद्भगवद्गीता और श्रीसप्तशती गीता (दुर्गा) ये दोनों जगत्प्रसिद्ध गीताएं श्रेष्ठ उपनिषद् स्वरूप हैं। वेदोक्त अध्यात्म रहस्य की प्रकाशक श्रीभगवद्गीता और अधिदैव रहस्यकी प्रकाशक श्री सप्तशती गीता है । ये दोनों गीताएँ कुछ विशेष अधिकार रखनेवाली हैं । इन दोनों गीताओं पर अपूर्व भाष्य श्रीभारतधर्ममहामण्डल शास्त्र प्रकाश विभाग द्वारा प्रणयन हो रहे हैं । श्रीभगवद्गीता के भाष्य का हिन्दी अनुवाद छपना प्रारम्भ भी होगया है ।

इन दोनों गीता शास्त्रों के अतिरिक्त सात और गीताएँ ऐसी हैं कि जिनका हिन्दी अनुवाद और टिप्पणी सहित प्रकाशित होना और सब धर्म जिज्ञासुओं को उनका अध्ययन करना परम आवश्यक है। विष्णु उपासना की श्रीविष्णुगीता, सौर उपासना की श्रीसूर्यगीता, शक्ति उपासना की श्रीदेवीगीता, गाणपत्य उपासना की श्रीगणेश गीता, शैव उपासना की श्रीशिवगीता, सब वर्ण, सब आश्रमोपयोगी श्रीगुरुगीता और सन्न्यास आश्रमोपयोगी सन्न्यासगीता इस प्रकार से ये सप्त गीताएं विशेष लोकहितकर हैं । इनमें से अनुवाद और टिप्पणी सहित श्रीगुरुगीता पहिले ही प्रकाशित हो चुकी है। श्रीसन्न्यासगीता यह प्रकाशित हो रही है और अन्यान्य गीताएं क्रमशः प्रकाशित होगीं ।

श्रीसन्न्यास गीता द्वादश अध्यायों में विभक्त है । इसमें साधारण धर्म, दानधर्म, तपधर्म, यज्ञधर्म, कालधर्म आदि के साथ साधु सन्न्यासियों के सब अधिकार भेद और विस्तारित धर्म वर्णित होने

श्रीविश्वनाथो जयति ।

श्रीसन्न्यास गीता

का

विज्ञापन ।

वैदिक सिद्धान्तों की सारभूत अनेक गीताएं पूज्यपाद महर्षियोंने जगत् के कल्याणर्थ प्रकाशित की हैं । श्रीमद्भगवद्गीता और श्रीसप्तशती गीता (दुर्गा) ये दोनों जगत्प्रसिद्ध गीताएं श्रेष्ठ उपनिषद् स्वरूप हैं। वेदोक्त अध्यात्म रहस्य की प्रकाशक श्रीभगवद्गीता और अधिदैव रहस्यकी प्रकाशक श्री सप्तशती गीता है । ये दोनों गीताएँ कुछ विशेष अधिकार रखनेवाली हैं । इन दोनों गीताओं पर अपूर्व भाष्य श्रीभारतधर्ममहामण्डल शास्त्र प्रकाश विभाग द्वारा प्रणयन हो रहे हैं । श्रीभगवद्गीता के भाष्य का हिन्दी अनुवाद छपना प्रारम्भ भी होगया है ।

इन दोनों गीता शास्त्रों के अतिरिक्त सात और गीताएँ ऐसी हैं कि जिनका हिन्दी अनुवाद और टिप्पणी सहित प्रकाशित होना और सब धर्म जिज्ञासुओं को उनका अध्ययन करना परम आवश्यक है। विष्णु उपासना की श्रीविष्णुगीता, सौर उपासना की श्रीसूर्यगीता, शक्ति उपासना की श्रीदेवीगीता, गाणपत्य उपासना की श्रीगणेश गीता, शैव उपासना की श्रीशिवगीता, सब वर्ण, सब आश्रमोपयोगी श्रीगुरुगीता और सन्न्यास आश्रमोपयोगी सन्न्यासगीता इस प्रकार से ये सप्त गीताएं विशेष लोकहितकर हैं । इनमें से अनुवाद और टिप्पणी सहित श्रीगुरुगीता पहिले ही प्रकाशित हो चुकी है। श्रीसन्न्यासगीता यह प्रकाशित हो रही है और अन्यान्य गीताएं क्रमशः प्रकाशित होगीं ।

श्रीसन्न्यास गीता द्वादश अध्यायों में विभक्त है । इसमें साधारण धर्म, दानधर्म, तपधर्म, यज्ञधर्म, कालधर्म आदि के साथ साधु सन्न्यासियों के सब अधिकार भेद और विस्तारित धर्म वर्णित होने

से यह ग्रन्थरत्न केवल चतुर्थ आश्रम धारी साधु सन्न्यासियों के लिये ही परम हितकारी नहीं, परन्तु सब वर्ण और सब आश्रम के लिये इस ग्रन्थ का अध्ययन करना परम लाभदायक है । गृहस्थ गण को तो इस ग्रन्थ रत्न से विविध ज्ञान प्राप्त हो सकता है ।

आजकल के साधु सन्न्यासियों में जो अनेक मत भेद, जो अनेक पन्थ भेद, जो अनेक सम्प्रदाय भेद, जो अनेक आचार भेद और जो अनेक विचारभेद देखने में आते हैं, उनका समन्वय करके शान्ति और पारस्परिक विरोध दूर करने के लिये यह ग्रन्थ रत्न परम उपयोगी है । निवृत्ति सेवी चतुर्थ आश्रम का अनुकरण करने वाले जितने प्रकार के साधु सन्न्यासी आदि हैं वे निरपेक्ष और आस्तिक बुद्धि से इस ग्रन्थ रत्नका स्वाध्याय करने से अपने अपने अधिकारानुसार आध्यात्मिक उन्नति करने में समर्थ होंगे इसमें सन्देह नहीं । वर्ण गुरु ब्राह्मण और आश्रम गुरु सन्न्यासी हैं । इस कारण ब्राह्मण वर्ण के सन्न्यासिगण ब्राह्मणादि सब वर्ण के स्वभाविक गुरु और नेता हैं इसमे अणुमात्र मत भेद नहीं है । सर्वमान्य सर्वसम्मत नेता सन्यासियों को सहायता देने योग्य उनके अधिकारों का निर्णायक और उनका मार्गप्रदर्शक होने से यह ग्रन्थ रत्न सन्न्यासी मात्र के लिये परम आदर और नियमित स्वाध्याय के उपयोगी है । इस ग्रन्थ रत्न का प्रचार जितना अधिक होगा, उतना ही हिन्दु समाजका कल्याण है ।

आजकलके नवशिक्षित लोग साधु सन्न्यासी मात्र के ऊपर विरुद्ध कटाक्ष करते हैं और वे यह सिद्ध करना चाहते हैं कि साधु सन्न्यासी हिन्दू समाज के गलग्रह और वृथा भारस्वरूप हैं । यद्यपि ऐसी विरुद्ध भावनाओं के उत्पन्न करने में आज कल के साधु सन्न्यासियों का कुछ दोष अवश्य है परन्तु इससे यह नहीं कहा जा सकता कि ऐसी चिन्ता करने वाले बिलकुल निर्दोष हैं । साधु सन्न्यासी गण समाज में अपना अधिकार भूल रहे हैं, सन्न्यास धर्मोक्त कर्म उपासना ज्ञानकी साधन प्रणाली वे विस्मृत हो गये हैं और सन्न्यासाश्रम का प्रधान धर्म निष्काम व्रत की आवश्यकता उनके स्मृति पटल से उठ ही गई है । दूसरी ओर आज कल के नव शिक्षित गृहस्थ गण आर्य जाति के इस सिद्धान्त को भूल ही गये हैं

कि पूज्य पाद महर्पियों के विचारानुसार साधुसन्न्यासी ही सब वर्ण और आश्रम के स्वाभाविक गुरु हैं और वेही हिन्दुसमाज के स्वाभाविक और चिरमान्य नेता हैं और हो सकते हैं। क्योंकि वसुधा को अपना कुटुम्ब मानना, सर्वलोक हितकर होना और जगत् के हितार्थ आत्मसमर्पण करना निष्काम व्रत परायण साधुसन्न्यासी के लिये ही सम्भव और सहज साध्य है। यह ग्रन्थ रत्न इन दोनों प्रकार के अधिकारियों की शङ्काओं के समाधान करने और दोनों को यथावत् इस विषय में मार्ग प्रदर्शित करने में सर्वथा उपयोगी है।

श्रीमहामण्डल के नियमानुसार शास्त्र प्रकाश विभाग की जिम्मेवरी और व्ययादिक का भार श्रीभारतधर्म महामण्डल के सञ्चालक पूज्यपाद श्री १०८ श्री स्वामीजी महाराज तथा अन्यान्य साधुओं पर सौंपा गया है। और पुस्तक विक्री की आमदनी निराश्रय दरिद्रों की सेवा के लिये श्री विश्वनाथ अन्नपूर्णा दानभण्डार को सौंपी गई है। उसी नियमानुसार इस पुस्तक का स्वत्त्वाधिकार उक्त दान भण्डार को दिया गया है। इस ग्रन्थ के प्रकाशित करने का व्यय खैरीगढ़ राज्येश्वरी परम धार्मिका गुरु भक्ति परायणा भारतधर्म लक्ष्मी श्रीमती सुरथ कुमारी देवी ने प्रदान किया है। श्रीमती को श्रीविश्वनाथ दीर्घायु करें और उनका यह आदर्श अन्यान्य नरपति वर्ग और राजकुल महिलाओं का अनुकरणीय हो।

निवेदक

गोविन्द शास्त्री दुगवेकर

सहकारी अध्यक्ष श्रीभारत धर्म महामण्डल,

शास्त्र प्रकाश विभाग, जगतगंज, बनारस।

श्रीसन्न्यासगीता
की
विषयानुक्रमणिका ।

प्रथम अध्याय ।

द्वितीय अध्याय ।

तृतीय अध्याय ।

सप्तम अध्याय।

अष्टम अध्याय।

नवम अध्याय।

ॐ नमः श्रीसच्चिदानन्दाय ।

श्रीसन्न्यासगीता

(भाषानुवाद और टिप्पणी सहित ।)

अनाद्यनन्तवैराजलीलैश्वर्यविभावन !
देशकालाऽपरिच्छिन्न ! जयस्वामिञ्जयोऽस्तु ते ॥ १ ॥
नमामि जगदुत्पत्तिस्थितिप्रलयकारणम् !
सर्वात्मानं परैश्वर्य्यमवाङ्मनसगोचरम् ॥ २ ॥
कर्मसाक्षिन् ! भक्तचित्तविहारिन् ! भूतभावन !
सर्वबुद्धिप्रेरकत्वात् स्मृतो लोके जगद्गुरुः ॥ ३ ॥
प्रार्थयामि ततो देव ! कृपया प्राणिनां धियः ।
जगत्कल्याणैकहेतुज्ञानमार्गे प्रवर्तय ॥ ४ ॥
प्रयागे नैमिषारण्ये विशालायां त्रिपुष्करे !
गङ्गासरस्वतीतीरे नर्मदायास्तटे तथा ॥ ५ ॥

जो श्रीभगवान् आदि अन्त रहित विराट् सृष्टि लीलारूप ऐश्वर्य्य के सञ्चालक हैं, जो देशकाल से अपरिच्छिन्न हैं और जो सकल अभ्युदय और निःश्रेयस के कर्म्मों में जय प्रदान करनेवाले हैं उनकी जय हो ॥ १ ॥ जगत् की उत्पत्ति स्थिति और लय के कारणरूप, सर्व्वात्मा, परमैश्वर्य्यवान् और वाणी और मन से अगोचर श्रीभगवान् को प्रणाम करता हूं ॥ १ ॥ हे कर्म्मों के साक्षीरूप ! हे भक्तों के चित्त में विहार करनेवाले ! हे भूतभावन ! आपकी सत्ता से सब चराचर सत्तावान् हैं, आपही सब प्राणियों की बुद्धि के प्रेरक हैं इस कारण आप जगद्गुरु कहे जाते हैं ॥३॥ अतः हे देव ! प्रार्थना यह है कि जगत् के कल्याण का एकही उपायरूप जो ज्ञानमार्ग है उसकी ओर प्राणि-मात्र की बुद्धियों को कृपापूर्वक प्रेरणा करिये ॥ ४ ॥ प्रयाग में, नैमिषारण्य में, उज्जयिनी में, त्रिपुष्कर में, गंगा, सरस्वती, नर्मदा,

तापीगोदावरीरेवायमुनागण्डकीतटे ।
हरिद्वारे कुरुक्षेत्रे तीर्थेष्वन्येष्वपि स्वयम् ॥ ६ ॥
ऋषयो मुनयः सिद्धा महात्मानश्चरन्ति यत् ।
तज्जगन्मङ्गलायेति निश्चितं तत्त्वदर्शिभिः ॥ ७ ॥
सन्तः कारुणिका नित्यं तीर्थव्याजेन सङ्गताः ।
दुष्कृतानि व्यपोहन्ति दिव्यज्ञानोपदेशिनः ॥ ८ ॥
नानाशास्त्रकथाख्यानकथनश्रवणादिभिः ।
उद्धरन्ति जनान् सर्वान् पावयन्ति परस्परम् ॥ ९ ॥
तस्मात्सर्वात्मना नूनं सङ्गं कुर्वीत साधुभिः ।
सर्वोपकारनिरताः सन्तः संसारतारकाः ॥ १० ॥
अस्ति वै नैमिपारण्यं सुप्रसिद्धं तपोवनम् ।
ऋषिभिर्मुनिभिर्जुष्टमनेकाश्रमशोभितम् ॥ ११ ॥
रसालैः सालहिन्तालैः प्रियालैश्च प्रियङ्गुभिः ।
तालैस्तमालैर्मन्दारैर्नागपुन्नागचम्पकैः ॥ १२ ॥

तापी, गोदावरी, यमुना और गण्डकी के तट पर, हरिद्वार में, कुरुक्षेत्र में और अन्य तीर्थों में भी ऋषि, मुनि, सिद्ध और महात्मा स्वयं विचरण करते हैं वह उनका विचारना जगत् के जीवों के मङ्गल के अर्थ है ऐसा तत्त्वदर्शियों ने निश्चय किया है ॥ ६-७ ॥ सत्पुरुष दयालु हैं वे तीर्थस्नान के व्याज (वहाने) से सम्मिलित होकर दिव्यज्ञान का उपदेश करते हुए नित्य ही पापों का नाश करते हैं ॥ ८ ॥ वे अनेक शास्त्रों की कथा और व्याख्यानों के कथन और श्रवणादि से सब मनुष्यों को उद्धार करते हैं और एक दूसरे को पवित्र करते हैं ॥ ९ ॥ इस कारण सर्व्वतोभावेन अवश्य ही सत्सङ्ग करना चाहिये क्योंकि सकल जीवों के उपकार में तत्पर महात्मा ही संसारसमुद्र से पार करनेवाले हैं ॥ १० ॥ नैमिपारण्य नामक सुप्रसिद्ध तपोवन है जो ऋषि और मुनियों से सेवित है एवं जो अनेक आश्रमों से शुशोभित है । जो कल्पवृक्ष समान समृद्धिवाले और दिव्य पुष्प, फल एवं पत्रवाले आम, साल, हिन्ताल, प्रियाल, प्रियङ्गु, ताल, तमाल, मन्दार, नाग,

द्राक्षेक्षुरम्भाजम्बूभिः कल्पवृक्षसमृद्धिभिः ।
पनसाश्वत्थन्यग्रोधैः पूगैः किंशुकचन्दनैः ॥ १३ ॥
कुन्दैः कुरवकैर्नीपैर्दिव्यपुष्पफलच्छदैः ।
द्रुमैः कामदुघैरन्यैः प्रपूर्णञ्चाऽतिशोभनम् ॥ १४ ॥
मनोज्ञकुसुमामोदनानावीरुद्विराजितम् ।
मल्लिकामाधवीजातिवासन्तीभिः सुमण्डितम् ॥ १५ ॥
सरित्सरोभिरच्छोदैर्लसद्रुचिरवालुकैः ।
कुमुदोत्पलकल्हारशतपत्रादिशोभितैः ॥ १६ ॥
हंससारसकादम्बचक्रारब्धकलस्वनैः ।
गुञ्जद्भ्रमरझङ्कारनादितैः समलङ्कृतम् ॥ १७ ॥
फलमूलाशनैर्दान्तैश्चारुकृष्णाजिनाम्बरैः ।
सूर्यवैश्वानरसमैस्तपसा भावितात्मभिः ॥ १८ ॥
महर्षिभिर्मोक्षपरैर्यतिभिर्नियतेन्द्रियैः ।
ब्रह्मभूतैर्महाभागैरुपेतं ब्रह्मवादिभिः ॥ १९ ॥

पुन्नाग, चम्पा, दाख, ईख, केला, जम्बू, पनस, अश्वत्थ, न्यग्रोध, सुपारी, किंशुक, चन्दन, कुन्द, कुरबक, नीप और कामफलप्रद अन्य वृक्षों से पूर्ण और सुशोभित है ॥ ११-१४ ॥ जो सुन्दर पुष्पों की सुगन्धि-वाली अनेक विस्तृत लताओं से विराजित है और मल्लिका, माधवी, जाति और वासन्ती लताओं से सुमण्डित है ॥ १५ ॥ जो स्वच्छ जल वाले, चमकीली सुन्दर बालुकावाले, कुमुद, कमल कल्हार और शतपत्रादि से सुशोभित, हंस सारस कादम्ब और चक्रवाकोंकी गम्भीर चहचहाट से युक्त एवं गूँजते हुए भँवरेके झङ्कारसे निनादित नदी और तालावोंसे समलङ्कृत है । जो फल और मूल भक्षण करनेवाले, तप के क्लेश को सहन करनेवाले, सुन्दर कृष्ण मृगचर्म के वस्त्रवाले, सूर्य्य और अग्नि के समान तेजस्वी, तप के द्वारा आत्मसाक्षात्कार करनेवाले, इन्द्रियसंयमी, मोक्ष में तत्पर, ब्रह्मवादी, ब्रह्मस्वरूप, संयमशील, महाभाग महर्षियों से युक्त है । जो जलमात्र पान करनेवाले, वायुमात्र पान करनेवाले, पत्ते घास

अब्भक्षैर्वायुभक्षैश्च पर्णाहारैस्तथैव च ।
चीरवल्कलसंवीतैः सर्वदाऽध्युषितं शिवम् ॥ २० ॥
अदंशमशकं रम्यमनालोकितदुर्जनम् ।
अश्रुताधिव्याधिदुःखमवितर्क्यतपःफलम् ॥ २१ ॥
यत्र सिंहादयो हिंस्रा अपि सौहृदमास्थिताः ।
निर्वैराः क्रौर्यनिर्मुक्ताश्चरन्त्येणैश्च गोकुलैः ॥ २२ ॥
शकुन्ता यत्र दृश्यन्ते मधुरस्वरगायनाः ।
ऋषिघुष्टाः सामगीतीर्गायन्ति शुकसारिकाः ॥ २३ ॥
तत्रैकदा पुण्यदेशे नैमिषे कल्मषद्विषि ।
समवेता महात्मानः सिद्धा ब्रह्मर्षिसत्तमाः ॥ २४ ॥
नाना तपःप्रदेशेभ्य आश्रमेभ्यश्च सर्वतः ।
तीर्थेभ्यो विविधेभ्यश्च प्रयता लोकपावनाः ॥ २५ ॥
सशिष्याः साग्नयः शान्ता पश्यन्तो वनमुत्तमम् ।
पावयन्तो जनान्मार्गे समाजग्मुः कृपालवः ॥ २६ ॥

खानेवाले, कौपीन और वल्कल धारण करनेवाले महर्षियों से सर्वदा अधिष्ठित और मङ्गलकर है ॥ १६-२० ॥ जो डांश और मच्छरों से रहित व मनोहर है, दुर्जनों ने जिसको देखा नहीं है । आधि, व्याधि और दुःख जहां सुने भी नहीं गये हैं। जहां के तप का फल अनुमान नहीं किया जा सक्ता है। जहां सिंहादि हिंस्र पशु भी गौ और मृगों के साथ मैत्री स्थापन करके निर्वैर हो क्रूरता से रहित होते हुए विचरण करते हैं। शकुन्त जहां मधुरस्वर से गायन करते दिखाई देते हैं और शुक एवं सारिकाएँ जहां ऋषियों के द्वारा गाये हुए सामवेद के गान को गाती हैं ॥ २१-२३ ॥ उस पापनाशक पुण्य देश नैमिषारण्य में एकबार लोकपावन, शान्त, संयमशील, ब्रह्मर्षि श्रेष्ठ, कृपालु, सिद्ध महात्मा चारों ओर के नाना तपः प्रदेशों से और आश्रमों से तथा विविध तीर्थों से चलकर अग्निहोत्र और शिष्यों को साथ लिए हुए, मार्ग में मनुष्यों को पवित्र करते हुए और उस उत्तम वन को देखते हुए आये ॥ २४ ॥ २६ ॥

अल्पज्ञान् प्राणिनः सर्वान् सत्सङ्गेनोद्दिधीर्षवः ।
तीर्थयात्राप्रसङ्गेन भूमौ सन्तश्चरन्ति हि ॥ २७ ॥
स्नाताः कृतार्चनाश्चर्षिदेवपितृर्पितर्पणाः ।
तत्रैवोपुः कियत्कालं ते कथालापनिर्वृताः २८ ॥
दिव्यज्ञानोपपन्नास्ते मुनयः शंसितव्रताः ।
तत्रैकदा पर्यटन्तः समैक्षन्तैकमाश्रमम् ॥ २९ ॥
वलिहोमार्चितं दिव्यं सुसंमृष्टानुलेपनम् ।
शुष्यच्छामाकनीवारं वेदिभिश्च विराजितम् ॥ ३० ॥
विशालैरग्निशरणैः स्रुग्भाण्डैराचितं शुभैः ।
दिव्यपुष्पोपहारैश्च सर्वतोऽभिविराजितम् ॥ ३१ ॥
शरण्यं सर्वभूतानां ब्रह्मघोषनिनादितम् ।
दिव्यमाश्रयणीयं तमाश्रमं श्रमनाशनम् ॥ ३२ ॥
प्रविशन्तः परं प्रीताः सर्व एव महर्षयः ।
ज्ञानोपदेशलाभाय पर्याप्तं मेनिरे स्थलम् ॥ ३३ ॥

क्योंकि सब अल्पज्ञानी प्राणियों को सत्सङ्ग द्वारा उद्धार करते हुए ही तीर्थ यात्रा के प्रसङ्ग से इस पृथिवी पर सत्पुरुष विचरण किया करते हैं ॥ २७ ॥ स्नान भगवदर्चन एवं देवता ऋषि और पितरों का तर्पण करके कथा वार्ता कहते हुए कुछ समय तक उन्होंने वहीं निवास किया ॥ २८ ॥ वहां एक दिन दिव्यज्ञानसम्पन्न व्रताचार-तत्पर उन मुनियों ने भ्रमण करते हुए एक आश्रमको देखा। जो वलि और हवन के द्वारा सुशोभित, देवभवनतुल्य और अत्यन्त परिष्कृत है। जिसमें श्यामाक और नीवार सूख रहे हैं, जो वेदियों से सुशोभित है, ॥ २९ ॥ ३० ॥ विशाल अग्निकुण्ड, और शुभ स्रुवा एवं पत्रों से सुशोभित दिव्य पुष्पों के उपहार से चारों ओर समावृत, सकल प्राणिमात्र का शरण्य, वेदघोष से निनादित, श्रमनाशन, आश्रय करने योग्य उस दिव्य आश्रम में परम प्रसन्न उन सबही महर्षियों ने प्रवेश किया। और ज्ञानोपदेश प्राप्त करने के लिये उस स्थान को पर्य्याप्त समझा ॥ ३१-३३ ॥

तदैवोपस्थितं तत्र याज्ञवल्क्यं महामुनिम् ।
सूर्यतेजप्रतीकाशं सर्वशास्त्रविशारदम् ॥ ३४ ॥
धर्मधर्माङ्गतत्त्वज्ञं वेदवेदाङ्गपारगम् ।
कर्मज्ञानोपासनार्घ्यसूक्ष्मतत्त्वावमर्शिनम् ॥ ३५ ॥
जितेन्द्रियं योगपरं मुनिवृन्दनिषेवितम् ।
यदृच्छया पर्यटन्तं दृष्ट्वा मुमुदिरे भृशम् ॥ ३६ ॥
अथाऽतिपूताः सुप्रीता मुनयो दिव्यदृष्टयः ।
भक्त्या प्रणामान् कुर्व्वाणाः समन्तादुपतस्थिरे ॥ ३७ ॥
चक्रिरे तस्य सत्कारं विधिनाऽऽसनसंस्थितम् ।
उपाजह्रुश्च सलिलं पुष्पमूलफलं शुचि ॥ ३८ ॥
गृहीतार्घ्यं ततः प्रीतं तं मुनिं ब्रह्मवादिनम् ।
विनयावनताः सर्वे सादरञ्चेत्थमूचिरे ॥ ३९ ॥
त्वद्दर्शनेन पूताः स्मः कृतकृत्या बभूविम ।
वयमत्र महाभाग ! करुणावरुणालय ! ॥ ४० ॥

वहां उसी समय सूर्य्य के तेज के समान तेजस्वी, सर्व्वशास्त्रविशारद, धर्म्म और धर्म्माङ्गों के तत्त्व को जाननेवाले, वेद और वेदाङ्गों के पारङ्गत, कर्म्म, ज्ञान और उपासना के पूजनीय सूक्ष्म तत्त्वों के विचार करनेवाले ॥ ३४-३५ ॥ जितेन्द्रिय, योगनिष्ठ, मुनिवृन्दों के द्वारा सेवित और अपनी इच्छा से ही पर्यटन करनेवाले उपस्थित महामुनि याज्ञवल्क्य के दर्शन करके अत्यन्त प्रसन्न हुए ॥ ३६ ॥ इसके अनन्तर अत्यन्त पवित्र, सुप्रसन्न. दिव्यदृष्टि मुनिगण भक्ति पूर्वक प्रणाम करते हुए चारों ओर खड़े हुए ॥ ३७ ॥ और आसन पर बैठे हुए महर्षि याज्ञवल्क्य का विधिपूर्वक सत्कार किया । एवं पवित्र जल, पुष्प, मूल और फलों का उपहार उनको अर्पण किया ॥ ३८ ॥ इसके पश्चात् अर्घ्य ग्रहण करके प्रसन्न चित्त उन ब्रह्मवादी मुनिश्रेष्ठ याज्ञवल्क्य से आदर सहित विनय पूर्वक नम्रहोकर इस प्रकार निवेदन किया ॥ ३९ ॥ हे करुणा के सागर ! महाभाग ! हम इस समय आपके दर्शन से पवित्र और कृतकृत्य हुए हैं ॥ ४० ॥

वयं सर्वेऽधुना तात ! प्रपन्नास्त्वां महामुने ! ।
शाधि ज्ञानप्रदानेन श्रूयसे ज्ञानभास्करः ॥ ४१ ॥
इति ब्रुवत्सु सर्वेषु याज्ञवल्क्यो महामतिः ।
अतिगम्भीरया वाचा स्मयमान उवाच ह ॥ ४२ ॥
साधु साधु महाभागाः ! प्रीतोस्मि विनयेन वः ।
ज्ञानतत्त्वं परं पुम्भिः शीलेनैवात्र लभ्यते ॥ ४३ ॥
शीलं हि परमा विद्या शीलमेव परं तपः ।
नैव शीलात्परं किञ्चित् तस्माच्छीलं सदाश्रयेत् ॥ ४४ ॥
लोकोपकारकर्तॄणि चरितानि भवादृशाम् ।
तदहं वः प्रवक्ष्यामि यत्प्रष्टव्यं तदुच्यताम् ॥ ४५ ॥
तच्छ्रुत्वा मुनयः प्रीताः मिथः सर्वे परामृशन् ।
पृच्छेत्सर्वहितं किञ्चित्कस्तादृग्बुद्धिमानिति ॥ ४६ ॥
एवं विचारयन्तस्ते निश्चित्य जैमिनिं मुनिम् ।
प्रार्थयन्त प्रश्रयेण भक्त्या परमया युताः ॥ ४७ ॥

हे प्रभो ! हे महामुने ! हम सब इस समय आपके शरणागत हैं हमको ज्ञानदान करके शासन कीजिये क्योंकि हमने सुना है आप ज्ञानिश्रेष्ठ हैं ॥ ४१ ॥ सबके इतना कहने पर महामति याज्ञवल्क्य अति गम्भीर वचनों से मुस्कराते हुए बोले । हे महाभागों ! ठीक है ठीक है, तुम्हारी नम्रतासे मैं प्रसन्न हूँ । इस संसार में ज्ञान का परम तत्त्व मनुष्यको शील से ही प्राप्त होता है । शीलही परम विद्या है, शीलही परमतप है, शील से बढ़कर कोई वस्तु नहीं है अतः शीलका सदा आश्रय करना चाहिये। आपके सदृश महामुनियों के चरित्र लोकोपकार करने वाले हैं अतः जो पृष्टव्य हो, सो कहिये मैं आपलोगों से वर्णन करूंगा ॥ ४२—४५ ॥ यह सुनकर मुनिगण प्रसन्न हो परस्पर विचार करने लगे कि ऐसा कौन बुद्धिमान् है जो सर्वहितकारी कुछ प्रश्न पूछे ॥ ४६ ॥ इस प्रकार सोच विचार कर उन्होंने जैमिनि मुनिको निश्चित किया और वे उनसे अत्यन्त भक्ति भावसे प्रार्थना करने लगे कि सब

भगवन् ! सर्वधर्मज्ञ ! त्वमस्मासु मतोऽधिकः ।
त्वमेक एव जानासि कर्मणो गहनां गतिम् ॥ ४८ ॥
तस्माद्वृतोसि भो ब्रह्मन् ! तत्त्वं धर्मस्य पृच्छ्यताम् ।
बहुशाखस्य धर्मस्य दुर्गमत्वं विदुर्बुधाः ॥ ४९ ॥
अतो धर्मञ्च धर्माङ्गान्यजानन्तोऽथ मोहिताः ।
वेदतत्त्वार्थविज्ञानहीनत्वाल्लक्ष्यविच्युताः ॥ ५० ॥
विवदन्ते नरा यत्र यत्र सन्दिहते सदा ।
तमेवोद्दिश्य विषयं जिज्ञासा क्रियतामिह ॥ ५१ ॥
त्रिविधेनैव तापेन परितप्ताः शरीरिणः ।
येन ज्ञानेन कल्याणमाप्नुयुस्तद्विचार्यताम् ॥ ५२ ॥
एतन्निशम्य सत्कृत्य तान्मुनीनथ जैमिनिः ।
मुनिराजं याज्ञवल्क्यं सत्कुर्वन्निदमब्रवीत् ॥ ५३ ॥

जैमिनिरुवाच ।

अहो पुण्य महोभाग्यं सफलश्चाऽद्य नस्तपः ।
जातमेवं विधे क्षेत्रे भवतो दर्शनं यतः ॥ ५४ ॥

धर्मों के जानने वाले हे भगवन् ! हम लोगों से आप श्रेष्ठ हैं । आप ही एक कर्मकी गहन गतिको जानते हैं इस लिये हे ब्रह्मन् ! आप ही व्रती होकर धर्मका तत्त्व पूछिये ॥ ४७–४९ ॥ अनन्त शाखाओं वाले धर्म की दुर्गमता पण्डित लोग जानते हैं । धर्म और धर्माङ्गों के न जानने से वे मोहित और वैदिक तत्त्वार्थ के विज्ञान से विहीन होने के कारण लक्ष्य भ्रष्ट हो रहे हैं ॥ ५० ॥ जिस विषय में लोग विवाद करते हैं और जहाँ सन्देह करते हैं, उसी विषय की आप जिज्ञासा कीजिये । तीन तापों से प्राणि मात्र परितप्त हैं, जिस ज्ञान से उनका कल्याण हो वही पूछिये ॥५१॥ ॥ ५२ ॥ यह सुन कर उन मुनियों के प्रति जैमिनीने कृतज्ञता प्रकट की और वे मुनिश्रेष्ठ याज्ञवल्क्य से आदर के साथ बोले ॥ ५३ ॥

महर्षि जैमिनीने कहाः–यह हमारा बड़ा सुकृत है, हमारा अहोभाग्य है, हमारा तप सुफल हुआ है, जो ऐसे क्षेत्र में हमें आपका दर्शन हुआ।

नूनमेषा भगवतः सर्वान्तर्यामिणो दया ।
यदस्माभिरियं प्राप्ता भवतः पुण्यसङ्गतिः ॥ ५५ ॥

अद्य ज्ञास्यामहे तत्त्वं गूढं वेदोपपादितम् ।
सारञ्च सर्वशास्त्राणां त्वन्मुखाम्भोजनिस्सृतम् ॥ ५६ ॥

तद् ब्रूहि भगवन् पूर्वमेतज्जिज्ञासितं हि नः ।
को भावः तस्य भेदास्तु कियन्तः परिकीर्तिताः ॥ ५७ ॥

का श्रद्धा कीदृशी चेयं भावशोधनकारिणी ।
कियन्त एव वा तस्या भेदाः ख्याता दयानिधे ॥ ५८ ॥

त्वदुक्तश्रवणोत्पन्नश्रद्धावृद्ध्या यथा वयम् ।
विशुद्धभावा संसारं सन्तरेम तथा कुरु ॥ ५९ ॥

अधिगन्तुञ्च भगवद्दिव्यभक्त्यधिकारिताम् ।
शक्नुमो ब्रह्मनिष्णात ! ब्रूहि सर्वं यथोचितम् ॥ ६० ॥

तदाकर्ण्य क्षणं ध्यात्वा याज्ञवल्क्योऽनुमोद्य तत् ।
कृपया परयाविष्टः प्रवक्तुमुपचक्रमे ॥ ६१ ॥

यह उस सर्वान्तर्यामी भगवान् की बड़ी दया है, जो हमें आपकी पुण्यकारिणी सङ्गति प्राप्त हुई है ॥ ५४ ॥ ५५ ॥ आज हम आपके मुख कमल से निःसृत वेदोक्त गूढ़तत्त्व और सब शास्त्रों का सार जानना चाहते हैं । इसलिये हे भगवन् ! यही हमारी पहिली जिज्ञासा है, इसी को पहिले कहिये । भाव क्या है, उसके भेद कितने हैं, श्रद्धा क्या है, भाव को शोधन करनेवाली वह कैसी है, उसके भेद कितने हैं ? हे दयानिधे ! आपके कथन को श्रवण कर उत्पन्न हुई श्रद्धा की वृद्धि से जिस प्रकार हम विशुद्ध भाव होकर संसार से तर जायँ ऐसा कीजिये । हे ब्रह्मज्ञ ! जिससे हम भगवान् की दिव्य भक्ति की अधिकारिता को जानने में समर्थ होजायं, वही यथोचित रूप से हमें सुनाइये ॥ ५६–६० ॥ यह सुनकर याज्ञवल्क्य ने क्षणमात्र ध्यान मग्न होकर महर्षि जैमिनी का अनुमोदन किया और वे परम कृपा से युक्त होकर बोलने का उपक्रम करने लगे ॥ ६१ ॥

याज्ञवल्क्य उवाच ।

भाव एवाऽत्र सूक्ष्मातिसूक्ष्मतत्त्वं निगद्यते ।
भावात्सूक्ष्मतरं किञ्चित्तत्त्वं न परिलक्ष्यते ॥ ६२ ॥
भावातीतमपि ब्रह्म ज्ञायते योगिभिः सदा ।
साहाय्येनैव भावस्य प्रथमं तत्त्ववेदिभिः ॥ ६३ ॥
ब्रह्मसाक्षात्कृतौ भावमन्तिमालम्बनं विदुः ।
सारूप्यावस्थितौ वृत्तेः सदसद्भावभेदतः ॥ ६४ ॥
उत्पद्येते तु भावेन पुण्यपापे उभे अपि ।
सूक्ष्मावस्था तु भावस्य त्रैविध्यमवलम्बते ॥ ६५ ॥
आध्यात्मिकाऽऽधिदैवाऽऽधिभौतिकानीति शास्त्रतः ।
ज्ञानिना भक्तराजेन तत्त्रयस्यावलम्बतः ॥ ६६ ॥
ब्रह्मेश्वरविराड्रूपैर्भगवान् दृश्यते क्रमात् ।
ब्रह्माण्डेषु च सर्वत्र ज्ञानिनस्तत्त्वदर्शिनः ॥ ६७ ॥
भावांस्त्रीन्सततं सम्यग्वीक्षन्ते सर्ववस्तुषु ।
भावो हि स्थूलावस्थायां सदसद्रूपमास्थितः ॥ ६८ ॥

महर्षि याज्ञवल्क्य बोले-यहां पर भावतत्त्व सूक्ष्म से भी अति सूक्ष्म कहा गया है । भाव से सूक्ष्म तो कोई तत्त्व ही नहीं दीख पड़ता । तत्त्ववेत्ता योगिगण भावातीत ब्रह्म को भी भाव की ही सहायता से जान लेते हैं । ब्रह्म-साक्षात्कार में भाव ही अन्तिम अवलम्ब है । सारूप्य अवस्था में वृत्ति के सत् और असत् भावों से ही पुण्य और पाप दोनों उत्पन्न होते हैं । भाव की सूक्ष्मावस्था शास्त्रों में त्रिविध कही गई है ॥ ६२-६५ ॥ यथा-आध्यात्मिक अवस्था, अधिदैव अवस्था और आधिभौतिक अवस्था । इन्हीं के अवलम्बन से भक्तराट् ज्ञानीगण क्रमशः ब्रह्म, ईश्वर और विराट् के रूपोंमें भगवान् को देखते हैं । ब्रह्माण्ड की सभी वस्तुओं में तत्त्वदर्शी ज्ञानीगण इन्हीं तीन भावों को भली भांति निरन्तर देखते हैं । स्थूल अवस्था में सत् और असत् रूपमें स्थित

स्वर्गञ्च नरकञ्चैव प्रापयत्यत्र मानवान् ।
श्रद्धाया जनको भाव आत्मोन्मुखकृताविह ॥ ६९ ॥
अन्तःकरणवृत्तेश्च श्रद्धैका मूलकारणम् ।
त्रिविधा भवति श्रद्धा देहिप्रकृतिभेदतः ॥ ७० ॥
सात्त्विकी राजसी चैव तामसीति बुभुत्सवः ।
तासान्तु लक्षणं विप्राः शृणुध्वं भक्तिभावतः ॥ ७१ ॥
श्रद्धा सा सात्त्विकी ज्ञेया विशुद्धज्ञानमूलका ।
प्रवृत्तिमूलिका चैव जिज्ञासामूलिकाऽपरा ॥
विचारहीनसंस्कारमूलिका त्वन्तिमा मता ॥ ७२ ॥
इति श्रीसन्न्यासगीतायां महर्षिसमागमो नाम प्रथमोऽध्यायः ॥

जैमिनिरुवाच ।

सर्वशास्त्रार्थतत्त्वज्ञ ! धर्माङ्गज्ञानभास्कर !
त्वत्समो वेदवेदाङ्गनिष्णतो नेतरो जनः ॥ १ ॥

हो कर भाव ही मनुष्योंको स्वर्ग अथवा नरक में पहुँचाता है । भाव श्रद्धा का जनक है और अन्तःकरण की वृत्ति को आत्मोन्मुख करने के लिये श्रद्धा ही मूल कारण है । प्राणियों की प्रकृति के अनुसार श्रद्धा तीन प्रकार की होती है ॥६६–७०॥ यथा–सात्विकी, राजसी और तामसी । हे धर्मतत्त्व के जानने की इच्छा करने वाले विप्रगण ! अब उनके लक्षण भक्ति भाव से सुनो । विशुद्ध ज्ञान मूलक श्रद्धा सात्विकी है, प्रवृत्ति और जिज्ञासा मूलक श्रद्धा राजसी है और विचार-हीन संस्कार मूलक तामसी श्रद्धा है ॥ ७१–७२ ॥

इस प्रकार श्री सन्न्यासगीता का महर्षि समागम नामक प्रथम अध्याय समाप्त हुआ ।

महर्षि जैमिनि बोले–हे सब शास्त्रार्थों के तत्त्वों को जानने वाले ! धर्माङ्गज्ञान के सूर्यस्वरूप ! आप के समान वेद और वेदाङ्गों में निष्णात दूसराकोई नहीं है । इसलिये हे धर्मज्ञों के धुरीण ! हमलोग

अतस्त्वां धर्मविद्धुर्यं पृच्छामो भक्तितो वयम् ।
ज्ञेयं स्फुटं सर्वमुक्त्वा जिज्ञासूननुकम्पय ॥ २ ॥

दुर्ज्ञेयं दुर्गमञ्चापि धर्मतत्त्वं नृणामिह ।
वहुशाखश्च वेदोऽयं दुर्वोध इति कीर्त्यते ॥ ३ ॥

सन्ति नाना पुराणानि स्मृतयो दर्शनानि च ।
व्यञ्जयन्ति च भिन्नानि स्वमतानि पृथक् पृथक् ॥ ४ ॥

आचार्या वहवस्तेषां मतश्चाऽपि विभिद्यते ।
तत एव वयं सर्वे तत्त्वं ज्ञातुं न शक्नुमः ॥ ५ ॥

भवान् संदर्शितो दैवाद्विधात्रा ज्ञानसागरः ।
अतस्त्वां परिपृच्छामः शाधि नः शरणागतान् ॥ ६ ॥

व्रूहि साङ्गं धर्मरूपं सरहस्यं सलक्षणम् ।
कर्मज्ञानोपासनानां तत्त्वञ्चाऽपि पृथक् पृथक् ॥ ७ ॥

निवृत्तिधर्म्मरूपस्य सन्न्यासस्य च तत्त्वतः ।
प्रशंसार्हस्य तत्त्वज्ञ निर्णयं वक्तुमर्हसि ॥ ८ ॥

आपसे भक्ति पूर्वक प्रश्न करते हैं, आप हमें जानने योग्य सव कुछ स्पष्ट तया कह कर हम जिज्ञासुओं पर दया करें । मनुष्यों के लिये धर्मतत्त्व दुर्वोध-और दुर्गम हो रहा है, वेद की अनेक शाखाएँ हैं और उनका जानना सहज नहीं ऐसा कहा जाता है ॥ १-३ ॥ अनेक पुराण व स्मृतियाँ और दर्शन हैं । वे अपने विभिन्न मत पृथक् पृथक् प्रकट कर रहे हैं ॥४॥ आचार्य अनेक हैं और उनके मत भी विभिन्न हैं। अतः हम तत्त्व को जानने में असमर्थ हैं ॥ ५ ॥ विधाताने आप जैसे ज्ञान सागर को हमें दिखा दिया है। इसीसे हम आप से पूछते हैं। आप हम शरणागतों को समझाइये ॥ ६ ॥ आप अङ्गों सहित, रहस्य सहित और लक्षणों सहित धर्म के स्वरूप को एवं कर्म, उपासना तथा ज्ञान के तत्त्व को पृथक् पृथक् कहिये। हे तत्त्वज्ञ ! प्रशंसा करने योग्य निवृत्ति धर्म्म रूप संन्यास तत्त्व का निर्णय कथन करने में

अनुकम्पासमुद्रोसि विश्रुतो जगतीतले।
तथोपदिश्यतां ब्रह्मन् कृपया परयान्वितः ॥ ९ ॥
यथा श्रुतौ दर्शनेषु पुराणेषु स्मृतिष्वपि।
यद्वेद्यं वास्तवं वस्तु विज्ञातं स्यादशेषतः ॥ १० ॥
कृतार्थयास्मज्जननं पूरयस्व मनोरथान्।
नृणां निःश्रेयसायैव दर्शनं स्याद्भवादृशाम् ॥ ११ ॥
जैमिनेर्मुनिवर्यस्य वचसा मुदितो भृशम्।
याज्ञवल्क्यो महातेजाः प्रहसन्निदमब्रवीत् ॥ १२ ॥

याज्ञवल्क्य उवाच।

प्रीतोस्मि मुनिशार्दूल! ज्ञातं युष्मत्समीप्सितम्।
नूनं विश्वहितायैव प्रश्नोऽयं मुनिसत्तम ॥ १३ ॥
यावत्कालं प्रवत्स्यामि तीर्थेऽस्मिन् व्रतमास्थितः।
तावद्वक्ष्ये यथाकालं तत्त्वं वेदादिनिश्चितम् ॥ १४ ॥

आप समर्थ हैं ॥ ७-८ ॥ आप दया सागर हैं, संसार में प्रसिद्ध हैं, इसलिये हे ब्रह्मन्! आप विशेष कृपा करके ऐसा उपदेश कीजिये जिससे वेद, दर्शन, पुराण और स्मृतियों में जो कुछ वास्तव में जानने योग्य है, उसका सम्पूर्ण रूप से हमें ज्ञान हो जाय ॥ ९-१० ॥ हमारे जन्म को आप कृतार्थ करें और मनोरथों को पूर्ण करें। आप जैसों का दर्शन निःसन्देह मनुष्यों के कल्याण के लिये ही होता है ॥ ११ ॥ मुनिवर जैमिनी के वचनों से अत्यन्त प्रसन्न होकर महान् तेजस्वी महर्षि याज्ञवल्क्य हँसकर बोले ॥ १२ ॥

हे मुनिशार्दूल! मैं आप से प्रसन्न हूं। आपकी इच्छा मुझे ज्ञात हुई है। हे मुनि श्रेष्ठ! आपका यह प्रश्न जगत् का कल्याण करने के लिये है ॥ १३ ॥ जब तक इस तीर्थ में मैं व्रती होकर रहूंगा तब तक समय समय पर वेद आदि से निश्चित तत्त्व का कथन करूंगा। और क्रमशः शास्त्रों के तत्त्वों को अधिकार भेदानुसार

यथाधिकारं सर्वाणि शास्त्रतत्त्वान्यहं क्रमात्।
श्रावयन्नपनेष्यामि युष्माकं सर्वसंशयान्॥ १५॥
यच्चाऽहमभिधास्यामि तदग्रे ख्यातिमेष्यति।
नाम्ना सन्न्यासगीतेति सारभूता श्रुतेः क्षितौ॥ १६॥
पठनाच्छ्रवणाद्यस्या जिज्ञासुश्छिन्नसंशयः।
ईशिष्यते मुक्तिपदप्राप्तये नाऽत्र संशयः॥ १७॥
अन्येऽपि यदि सन्देहा भवेयुर्मनसि स्थिताः।
तदाख्येयास्तेपि सर्वे निर्विशङ्कं ममाग्रतः॥ १८॥

जैमिनिरुवाच।

भगवन्! सर्वधर्मज्ञ! ब्रूहि धर्मस्य लक्षणम्।
के हि साधारणा धर्मा विशिष्टाः के च कीर्त्तिताः॥ १९॥
कियन्ति धर्मस्याङ्गानि विस्तरेण वदस्व नः।
यथा नराः परं श्रेय इह च प्रेत्य चाप्नुयुः॥ २०॥

याज्ञवल्क्य उवाच।

यतोऽभ्युदयमुत्कृष्टमैहलौकिकमाप्नुयुः।
हितञ्चाऽमुष्मिकं निःश्रेयसं धर्मः स कीर्त्तितः॥ २१॥

सुनाता हुआ आप के सब सन्देहों को दूर करूँगा॥ १४-१५॥ जो कुछ मैं कहूंगा, वह श्रुति की सारस्वरूप संन्यास गीता के नाम से आगे पृथ्वीपर प्रसिद्ध होगी। जिसके पढ़ने सुनने से जिज्ञासु के सन्देह दूर हो जायंगे और निःसन्देह वह मुक्तिपदप्राप्ति के लिये समर्थ होजायगा॥१६-१७॥ इनके अतिरिक्त और भी यदि कोई सन्देह आपके मनमें हों तो वे भी सब मेरे आगे निःशङ्क होकर कहें॥ १८॥

महर्षि जैमिनि बोले-हे सब धर्मोंके जानने वाले भगवन्! आप धर्म के लक्षण को कहिये। साधारण धर्म कौनसे हैं, विशेष धर्म कौनसे कहे गये हैं, धर्म के अङ्ग कितने हैं, यही हमें विस्तार से कहिये। जिस से मनुष्यों को इह लोकमें और परलोक में परम श्रेय प्राप्त हो॥१९-२१॥

महर्षि याज्ञवल्क्य बोले-जिससे इहलोक में उत्कृष्ट अभ्युदय और परलोक में सुख एवं मोक्ष प्राप्त होता है, वही धर्म कहा गया

श्रुतिस्मृत्युदितो धर्म्मस्त्वधर्मस्तद्विपर्यय:।
यत: स्वर्गश्च मोक्षश्च स धर्म्मो विदुषां मत:॥ २२॥
धर्मात्प्रवर्द्धते सत्त्वं पुरुषार्थप्रवर्द्धनम्।
जगद्धारणहेतुत्वाद्धर्मत्वं तस्य चेष्यते॥ २३॥
प्रकाशकत्वात्सत्त्वस्य ज्ञानहेतुत्वमीर्य्यते।
लघुत्वादूर्ध्वनेतृत्वं सत्त्वाद्धर्मो हि निर्वभौ॥ २४॥
स्वद्व: सत्त्वाभिवृद्धिर्यैर्मनोवाक्कायकर्मभि:।
तानि सर्वाणि कर्माणि धर्म इत्येष निर्णय:॥ २५॥
धर्म्माचाररत: सत्त्वं वर्द्धयन् परमोन्नतिम्।
ऐहिकीमामुष्मिकीं च प्राप्य मोक्षं ततोऽश्नुते॥ २६॥
धर्म्मं यो बाधते धर्मो कुधर्म्म: स हि वस्तुत:।
अविरोधी तु यो धर्म्म: स धर्मो मुनिपुङ्गवा:॥ २७॥

है॥ २१॥ जिसका उदय श्रुतिस्मृति से हुआ है वह धर्म, और उससे विपरीत अधर्म है। जिससे स्वर्ग और मोक्षकी प्राप्ति होती है ज्ञानियों के मत से वही धर्म है। २२। धर्म से पुरुषार्थ की वृद्धि करने वाला सत्त्वगुण बढ़ता है और जगत् को धारण करने के कारण ही उसे धर्म कहते हैं॥ २३॥ धर्म्म सत्त्व गुण का प्रकाशक होने से ज्ञान का कारण है और सूक्ष्म होने से सत्त्व के ही कारण वह उन्नतिकारी है, जो मन, वाणी और काया से किये हुए कर्म स्वयं सत्त्व की अभिवृद्धि करें वे सब कर्म ही धर्म हैं, ऐसा निर्णय किया गया है॥ २४–२५॥ धर्माचरण में रत मनुष्य सत्त्व गुण को बढ़ाता हुआ ऐहिक और पारलौकिक परम उन्नति को प्राप्त करने पर मोक्ष पाता है *॥ २६॥ जो धर्म दूसरे धर्म का बाधक

---

* सत्त्व गुण वर्धक धर्म्म की उत्तरोत्तर तीन दशाएँ वर्णन की गई हैं। पहिली दशा में धर्म प्रथम अधिकारीको इस लोक के सुख देता है, दूसरी दशा में मध्यम अधिकारी को धर्म स्वर्गादि पारलौकिक सुख देता है और अन्तिम दशामें सर्वोत्तम अधिकारी को धर्म निर्वाण मुक्ति पद में पहुंचा देता है। यथा क्रम ये तीनों अधिकार समझे जायं।

उक्तः सामान्यधर्मोऽयं विशिष्टस्त्वतिरिच्यते।
अधिकारिविभेदेन स ह्यनेकविधः स्मृतः॥ २८॥
सधवाविधवादीनां स्त्रीणां भेदस्य दर्शनात्।
प्रत्येकं भिद्यते धर्मस्तथा पुंस्वपि सर्वथा॥ २९॥
मूर्खपण्डितसंन्यस्तगृहस्थादिविभेदतः।
सर्वेषामेव प्रत्येकं धर्माः प्रोक्ताः पृथक् पृथक्॥ ३०॥
सर्वत्र व्यापकादस्मात् सर्वजीवहितैषिणः।
धर्मात् सनातनादेव सर्वे धर्म्माः समुत्थिताः॥ ३१॥
सनातने ह्यार्यधर्मे वैदिकाचारपालना।
सदाचारसतीधर्माध्यात्मतत्त्वविचारणा॥ ३२॥
वर्णाश्रमाधीनकर्मविभागश्चाऽत्र विद्यते।
अस्मादन्योऽनार्यधर्म इत्यस्मच्छास्त्रनिश्चयः॥ ३३॥

हो, वह वास्तव में कुधर्म है। हे मुनिश्रेष्ठो! जो धर्म किसी से विरोध नहीं रखता, वही सच्चा धर्म है॥ २७॥ † यह सामान्य धर्म कहा गया है, विशेष धर्म पृथक् है। जो अधिकारिभेद से अनेक प्रकार का होता है। स्त्रियों में सधवा और विधवा इस प्रकार से भेद देख पड़ते हैं, अतः उनके धर्म भी विभिन्न हैं। यही बात पुरुषों की है। मूर्ख और पण्डित, सन्न्यासी और गृहस्थ इस प्रकार के जो पुरुषों में भेद हैं, तदनुसार उनके धर्म भी अलग अलग कहे गये हैं॥ २८-३०॥ सनातन धर्म सर्वजीव हितकारी और सर्वव्यापक होने के कारण इसीसे संसार के सब धर्म निकले हैं॥३१॥ सनातन आर्यधर्म में वैदिक आचारों का पालन होता है, एवं सदाचार, सतीधर्म और आध्यात्मिक तत्त्वों का विचार रक्खा गया है॥ ३२॥ और इसमें वर्णाश्रम के अनुसार कर्म्म विभाग किया गया है। इसी से यह आर्य धर्म और इस से भिन्न अनार्य धर्म है, ऐसा हमारे शास्त्रों का निश्चय है॥ ३३॥ जो इस

---

† यही सर्वव्यापक सर्वजीव हितकारी सनातन धर्मका लक्षण है।

येवं सदाचारवर्णाश्रमधर्मानुगामिनी ।
सर्वस्वं मनुते वेदं सार्यजातिरिति स्मृतिः ॥ ३४ ॥
एतद्भिन्नाऽनार्यजातिः सदाचारादिवर्जिता ।
अन्यदप्येवमेवोह्यं नोच्यते विस्तृतेर्भयात् ॥ ३५ ॥
अङ्गानि त्रीणि धर्मस्य दानं यज्ञस्तपस्तथा ।
स्कन्धरूपाणि धर्मस्य शाखिनः पावनानि हि ॥ ३६ ॥
दानञ्चापि त्रिधा प्रोक्तं विद्याऽर्थाऽभयदानतः ।
तत्रापि गुणभेदेन नवधा दानमीर्यते ॥ ३७ ॥
एवं तपस्त्रिधा ज्ञेयं कायिकं वाचिकं तथा ।
मानसञ्चाथ गुणतः प्रत्येकं त्रिविधं पुनः ॥ ३८ ॥
यज्ञधर्मविभेदास्तु मुनीनां बहवो मताः ।
कर्मज्ञानोपासनाख्या भेदा मुख्यास्त्रयः स्मृताः ॥ ३९ ॥
कर्मयज्ञस्य षड् भेदा नित्यं नैमित्तिकं तथा ।
काम्यमाध्यात्मिकं चैवाऽऽधिदैवञ्चाधिभौतिकम् ॥ ४० ॥

प्रकार से सदाचार और वर्णाश्रम धर्म का अनुसरण करती हो एवम् वेद को ही अपना सर्वस्व समझती हो, स्मृति के मत से वही आर्य जाति है ॥ ३४ ॥ इससे भिन्न अनार्य जाति है जो सदाचार से रहित है । इसी प्रकार अन्य बातें भी जानलेनी चाहिये जो विस्तार के भय से यहाँ पर नहीं कही जा सकतीं ॥ ३५॥ धर्मरूपी वृक्ष के पवित्र स्कन्ध स्वरूप दान, यज्ञ और तप इस प्रकार से तीन अङ्ग हैं ॥ ३६ ॥ दान भी तीन प्रकार के होते हैं । विद्यादान, अर्थ दान और अभय दान। इनमें से हर एक की सात्त्विक, राजसिक और तामसिक गुण भेदानुसार गणना करने से दान सब मिलाकर नौ प्रकार का होता है ॥ ॥३७॥ इसी प्रकार से तप भी त्रिविध होता है। यथा—कायिक, वाचिक और मानसिक । इनमें से हर एक सात्त्विकादि गुण भेदानुसार त्रिविध होने के कारण सब मिला कर तप भी नौ प्रकार का होता है ॥ ३८ ॥ यज्ञ धर्म के भेद मुनियों के मत से अनेक हैं, किन्तु उनमें कर्म यज्ञ, उपासना यज्ञ और ज्ञान यज्ञ येही तीन मुख्य कहे गये हैं ॥ ३९ ॥ कर्म यज्ञ के छः भेद हैं । यथा—नित्य, नैमित्तिक,

सत्वादिगुणयोगेन भेदास्तत्रापि पूर्ववत् ।
अतोऽष्टादशधा कर्म प्रत्येकं गुणयोगतः ॥ ४१ ॥
तथैवोपासनायज्ञो मुनिभिर्बहुधा मतः ।
परं मुख्यप्रभेदास्तूपासनापद्धतेरिमे ॥ ४२ ॥
उपास्तिर्ब्रह्मणस्त्वाद्या द्वितीया सगुणस्य च ।
तृतीया स्मर्यते लीलाविग्रहोपासना बुधैः ॥ ४३ ॥
चतुर्थी पितृदेवर्षिगणानामस्त्युपासना ।
अन्तिमा क्षुद्रदेवानां प्रेतादीनां विधीयते ॥ ४४ ॥
अन्येऽपि तस्याश्चत्वारो भेदाः साधनपद्धतेः ।
तत्रादिमो मन्त्रयोगः स्थूलध्यानैकसाधनः ॥ ४५ ॥
द्वितीयो हठयोगः स्याज्ज्योतिर्ध्यानैकसाधनः ।
लययोगस्तृतीयोऽसौ विन्दुध्यानविधानकः ॥ ४६ ॥
राजयोगोऽन्तिमस्तत्र ब्रह्मध्यानं विधीयते ।
भेदा नवानामप्येषां गुणतः सप्तविंशतिः ॥ ४७ ॥

काम्य, आध्यात्मिक, आधिदैविक और आधिभौतिक ॥ ४० ॥ पूर्ववत् सात्विकादि गुण भेदानुसार हर एक कर्म तीन तीन प्रकार का होने से सब कर्म अठारह प्रकार के हैं ॥ ४१ ॥ इसी तरह मुनियों ने उपासना यज्ञ भी अनेक प्रकार के कहे हैं। परन्तु उपासना पद्धति के मुख्य भेद निम्न लिखित हैं ॥ ४२ ॥ पहिली ब्रह्मोपासना, दूसरी सगुणोपासना, तीसरी अवतारोपासना, चौथी पितृगण, देवगण और ऋषिगण की उपासना एवम् पांचवीं प्रेतादि क्षुद्र देवों की उपासना विज्ञ पुरुषों ने कही है ॥ ४३–४४ ॥ इनके अतिरिक्त उपासना की साधन पद्धति के और भी चार भेद हैं। उनमें प्रथम मन्त्रयोग है, जिसका साधन स्थूल ध्यान से होता है। दूसरा हठयोग है, जिसका साधन ज्योति के ध्यान से होता है। तीसरा लय योग है, जिसमें विन्दुध्यान करने की विधि है और चौथा राजयोग है, जिसमें ब्रह्मका ध्यान किया जाता है। इस प्रकार की नवविध उपासना के सात्विकादि गुणानुसार २७ भेद हैं ॥ ४५-४७ ॥

श्रवणं मननञ्चैव निदिध्यासनमेव च ।
त्रिधैवं ज्ञानयज्ञोऽपि नवधा स्याद्गुणाश्रयात् ॥ ४८ ॥
इत्यन्त्रशासुर्धर्मस्य मुख्यान् भेदानशेषतः ।
चतुर्विंशतिसंख्याकान् मुनयस्तत्त्वदर्शिनः ॥ ४९ ॥
एतेषामपि धर्माङ्गभेदानां गुणभेदतः ।
भेदा द्विसप्ततिर्भूयो भवन्तीति विभाव्यताम् ॥ ५० ॥
एषु जीवहितायैकमप्यङ्गं यद्यनुष्ठितम् ।
व्यष्टिबुद्ध्या नरैरत्र यज्ञ इत्युच्यते तदा ॥ ५१ ॥
समष्ट्या सर्वजीवानां हिताय यदनुष्ठितम् ।
एकञ्चापि तदा तच्च महायज्ञ इतीर्यते ॥ ५२ ॥
सत्त्वेन सेवितं ह्येकमप्यङ्गं पूर्णरूपतः ॥
प्रापयत्येकमप्येतन्नरं मुक्तिपदं क्षणात् ॥ ५३ ॥
यथा स्फुलिङ्गश्चैकोऽपि विश्वन्दहति सेन्धनः ।
एवं दहत्येकमङ्गमपि कर्माणि सर्वशः ॥ ५४ ॥

ज्ञान यज्ञ भी श्रवण, मनन और निदिध्यासन इस प्रकार से त्रिविध है । और हरएक सात्त्विकादि गुण भेदानुसार त्रिविध होने से ज्ञान यज्ञ नौ प्रकार का कहा जाता है ॥ ४८ ॥ तत्त्वदर्शी मुनियोंने इस प्रकार से धर्म के सम्पूर्ण भेदों में से मुख्य २४ भेद बताये हैं । धर्माङ्गों के इन २४ भेदों के सात्त्विकादि गुणानुसार ७२ भेद होते हैं, यह समझ लेना चाहिये ॥ ४९-५० ॥ यदि मनुष्य जीव के हित के लिये व्यष्टि बुद्धि अर्थात् प्रत्येक व्यक्ति के कल्याण के विचार से इनमें से एक भी अङ्ग का अनुष्ठान करे तो उसे यज्ञ कहते हैं। और समष्टि बुद्धि से सब जीवों के हित के लिये यदि मनुष्य इनमें से किसी एकका अनुष्ठान करे तो उसे महायज्ञ कहते हैं ॥ ५१-५२ ॥ सात्त्विक भाव रखकर इनमें से एक भी अङ्ग का यदि पूर्ण रूप से पालन किया जाय तो वह मनुष्य को क्षण मात्र में मुक्ति पद को पहुँचा सकता है ॥ ५३ ॥ जैसे एक ही चिनगारी इन्धन युक्त होने से समस्त विश्वको जला देती है, वैसा धर्म का एक ही अङ्ग सब

अहिंसाज्ञानयोगादिधर्मोपाङ्गाश्रयेण ह ।
जगत्यां बौद्धधर्मोऽपि प्रथितः प्रचलिष्यति ॥ ५५ ॥
तथा द्वीपान्तरेष्वेवं केतुमालादिषु क्वचित् ।
वर्षेषु सत्यतास्वार्थत्यागिता च गुणादरः ॥ ५६ ॥
ज्ञानार्जनस्पृहा नित्यं नियमानाञ्च पालनम् ।
इमाः सर्वा भविष्यन्ति प्रशस्ता धर्मवृत्तयः ॥ ५७ ॥
यासामालम्बनादेव पाश्चात्याः परमोन्नताः ।
माननीयत्वमेष्यन्ति जगत्यां सुप्रतिष्ठिताः ॥ ५८ ॥
पितॄणां गुरुवृद्धानां शुश्रूषा राजभक्तता ।
धैर्यञ्च ब्रह्मचर्यञ्च क्षात्रधर्मानुरागिता ॥ ५९ ॥
इत्यादि कतिचिद्धर्मवृत्तिबाहुल्यसेवनात् ।
प्रख्यास्यति जयप्राणो देशः स्वल्पोपि भूतले ॥ ६० ॥
अत एवान्यदेशीयाः परोत्कर्षासहिष्णवः ।
अर्चिष्यंति तथाऽप्येनं केतुमालादिवासिनः ॥ ६१ ॥
तदेवं प्रतिपद्यध्वे विमृश्येत क्षणं यदि ।
ता धर्मवृत्तयोऽप्यस्मद्धर्म्मोपाङ्गानि सन्ति हि ॥ ६२ ॥

कर्मों को भस्म कर देता है ॥ ५४ ॥ अहिंसा और ज्ञान योगादि धर्म के उपाङ्गों का ही आश्रय करने से संसार में बौद्ध धर्म प्रसिद्ध होकर फैलेगा ॥ ५५ ॥ इसी तरह कहीं कहीं केतुमालादि द्वीपान्तरों में भी सत्यता, स्वार्थत्यागिता, गुणग्राहकता, ज्ञानसम्पादन की इच्छा, नित्य नियमों का पालन ये सब प्रशस्त धर्म वृत्तियाँ उदित होंगी ॥ ५६-५७ ॥ जिनके अवलम्बन से पश्चिमी लोग संसार में भली भांति प्रतिष्ठित और अत्यन्त उन्नत होकर माननीय बनेंगे ॥ ५८ ॥ इनके अतिरिक्त माता पिता और वृद्ध गुरुजनों की सेवा, राजभक्ति; धैर्य, ब्रह्मचर्य, क्षात्रधर्म में अनुराग इत्यादि कई एक धार्मिक वृत्तियों का अधिक अभ्यास करने से छोटा भी जयप्राणदेश पृथ्वी में प्रसिद्ध हो जायगा। अतएव दूसरों का उत्कर्ष सहन न करनेवाले अन्यदेशीय केतुमलादिवासी उस देश के निवासियों का आदर करने लगेंगे ॥ ५९-६१ ॥ अतः क्षणमात्र विचार किया जाय तो सिद्ध होगा कि उक्त

कानि कस्येति कथ्यन्ते धर्म्मोपाङ्गानि तत्त्वतः ।
तपसो मानसस्याहुः सत्यं वै मुनिसत्तमाः ॥ ६३ ॥
तथा कलिप्रधानस्य दानस्य स्वार्थत्यागिता ।
पितृपूजोपासनायाः क्षात्रं कर्म तु कर्मणः ॥ ६४ ॥
समष्टिरूपेणैतानि देशजात्यर्थकानि चेत् ।
महायज्ञोपाङ्गभावं भजन्तीति विभाव्यताम् ॥ ६५ ॥
अवस्थाभेदतश्चैका धर्मस्य वृत्तिरास्वपि ।
भवेद्विभिन्नधर्माङ्गोपाङ्गमित्यपि बुध्यताम् ॥ ६६ ॥
मनोवृत्त्या सह स्वार्थत्यागः सम्बध्यते यदा ।
तपसः खलु जानीहि तमुपाङ्गं तदा मुने ॥ ६७ ॥
त्यागोऽसौ चेत्प्रकाश्येत यशोऽर्थं दानिना स्वयम् ।
तदा स्याद्दानधर्मस्योपाङ्गमेव न संशयः ॥ ६८ ॥
एवं विज्ञानवित्कश्चिद्यदि पश्येत् समाहितः ।
तदा निश्चिनुयादस्मद्धर्मस्योत्तमतां क्षणात् ॥ ६९ ॥

धर्म वृत्तियाँ हमारे धर्म की उपाङ्ग ही हैं ॥ ६२ ॥ अब धर्म के किस अङ्ग के कौन से उपाङ्ग हैं, सो तात्त्विक रीति से कहे जाते हैं । हे मुनिश्रेष्ठो ! मानसिकतप का उपाङ्ग सत्य है । कलिकाल के विचार से प्रधान धर्माङ्ग दान का उपाङ्ग स्वार्थ त्याग है। उपासना यज्ञ का उपाङ्ग पितृपूजा है कर्मयज्ञ का उपाङ्ग क्षात्रधर्म है । समष्टि रूप से देश और जाति के लिये किये जाते हों, तो येही उपाङ्ग महायज्ञ के भाव को प्राप्त होते हैं ऐसा समझना चाहिये ॥ ६३-६५ ॥ यहां पर यह भी समझ लेना चाहिये कि अवस्थाभेद से धर्म की एक ही वृत्ति विभिन्न धर्माङ्ग का उपाङ्ग बन जाती है ॥ ६६ ॥ मनोवृत्ति के साथ जब स्वार्थत्याग का संबंध हो जाता है, तब हे मुने! उसे निश्चय से तप का ही उपाङ्ग जानो ॥ ६७ ॥ दानी यदि वही त्याग यश की इच्छा से स्वयं प्रकट करे, तो इसमें अणुमात्र सन्देह नहीं कि वह त्याग दान धर्मका उपाङ्ग होगा ॥ ६८ ॥ इस प्रकार से कोई विज्ञानवेत्ता यदि सावधान होकर देखे, तो वह हमारे धर्म की उत्तमता का क्षणमात्र में निश्चय करलेगा ॥ ६९ ॥

भूमौ विभिन्नधर्माणामाचार्याः सर्व एव हि ।
ते सनातनधर्माङ्गसाहाय्यं प्रतिपेदिरे ॥ ७० ॥
धृतिर्दानं क्षमाऽस्तेयं शौचमिंद्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो धर्मसामान्यवृत्तयः ॥ ७१ ॥
एताः सर्वान्यधर्मेषु सर्वास्त्वखिलजातिषु ।
सर्वमर्त्यसमाजे च व्याप्ताः सन्तीति मन्यताम् ॥ ७२ ॥
अत एवास्य धर्मस्य गरीयस्त्वं सुसिद्ध्यति ।
सर्वधर्मप्रसविता ततश्चैषोऽत्र गीयते ॥ ७३ ॥
यं पृथक् धर्मचरणाः पृथक् धर्मफलैषिणः ।
पृथक् धर्मैः समर्चन्तितस्मै धर्मात्मनेनमः ॥ ७४ ॥

इति श्रीसन्न्यासगीतायां साधारणधर्मनिरूपणं नाम
द्वितीयोऽध्यायः ।

पृथ्वीपर जुदे जुदे धर्मों के सभी आचार्य सनातन धर्म के किसी न किसी अङ्ग की सहायता से अपने धर्म का प्रतिपादन करते हैं ॥७०॥ धैर्य, दान, क्षमा, चोरी न करना, पवित्र रहना, इन्द्रियों का निग्रह करना, बुद्धि बढ़ाना, विद्या पढ़ना, सत्य का पालन करना और क्रोध न करना ये तो धर्म की सामान्य वृत्तियाँ हैं ॥७१॥ ये सभी अन्यधर्मों में, सब जातियों में और सब मनुष्यसमाज में व्याप्त हैं, ऐसा मानना ही होगा ॥७२॥ इसी से इस सनातनधर्म की श्रेष्ठता सिद्ध होती है और इस से सब धर्मोंका यह जनक है ऐसी प्रसिद्धि है ॥१४४॥ विभिन्न धर्मोंका आचरण करने वाले और विभिन्न धर्मों के फलों की इच्छा करने वाले विभिन्न धर्मों से जिस की पूजा करते हैं, उस धर्मस्वरूप परमात्मा को प्रणाम है, ॥ १४५ ॥

इस प्रकार श्रीसन्न्यास गीता का साधारण धर्मनिरूपण नामक
द्वितीय अध्याय समाप्त हुआ ।

जैमिनिरुवाच।

व्याख्यातं कृपया ब्रह्मन् धर्मतत्त्वविदा त्वया।
साङ्गं धर्मं समाकर्ण्य सञ्जाताश्छिन्नसंशयाः ॥ १॥
अथाख्याहि मुने ! दान-धर्मतत्त्वमशेषतः।
यस्मिञ् ज्ञाते नराः सर्वे लभेरन् परमं हितम् ॥ २ ॥
ऋषीणां तद्वचः श्रुत्वा याज्ञवल्क्यो मुनीश्वरः।
कृपया परयाविष्टः प्रहसन्निदमब्रवीत् ॥ ३ ॥

याज्ञवल्क्य उवाच।

श्रूयतां दानधर्मस्य रहस्यं मुनयोऽधुना।
त्रीण्यङ्गानीह धर्मस्य दानं यज्ञस्तपस्तथा ॥ ४ ॥
त्रिष्वप्यंगेषु धर्मस्य दानमेकं विशिष्यते।
विशेषतः कलावेतत्प्रधानं हितसाधनम् ॥ ५ ॥
निर्विशेषतया सर्वे यतो दानेऽधिकारिणः।
तस्माद्दानं प्रशंसन्ति सर्वशास्त्रविशारदाः ॥ ६ ॥

महर्षि जैमिनि बोले—हे धर्मतत्त्व के जानने वाले ब्रह्मज्ञ! आपने कृपा करके अङ्गों सहित धर्म कहा उसको सुनकर हमारे सन्देह मिट गये ॥ १ ॥ अब हे मुने ! दान धर्म के तत्त्व को सम्पूर्णरूप से कहिये ; जिस के जान लेने से सभी मनुष्यों का कल्याण होगा ॥ २ ॥ ऋषियों का यह वचन सुनकर मुनिश्रेष्ठ याज्ञवल्क्य परम कृपालु होकर हँसते हुए बोले ॥ ३ ॥

हे मुनिगण! अब दान धर्म का रहस्य सुनिये। धर्म के दान, यज्ञ और तप इस प्रकार से तीन अङ्ग हैं ॥ ४ ॥ धर्म के उक्त तीनों अङ्गों में प्रथम अङ्ग दान श्रेष्ठ है। विशेषतया कलियुग में तो यही सर्व प्रधान कल्याण का साधन है ॥ ५ ॥ साधारणतया सभी दान करने के अधिकारी हैं। इसीसे सब शास्त्रों के ज्ञाता गण दान की प्रशंसा करते हैं ॥ ६ ॥ हे मुनि गण ! अपना सम्बन्ध छोड़कर जो कुछ

स्वसम्बन्धमपाकृत्य यदन्यस्मै प्रदीयते।
तद्दानमिति सामान्यलक्षणं मुनयो विदुः॥ ७॥
तत्रापि दत्तवस्तुभ्यः सम्बन्धं मानसं स्वतः।
सर्वथा क्षपयेद्योऽसौ स वदान्यशिरोमणिः॥ ८॥
अतीव दुष्करन्त्वेतत्कर्म प्रोक्तं मनीषिभिः।
यदपाक्रियते चित्तसम्बन्धश्चिरसम्भृतः॥ ९॥
सुसाधितं सर्वमेव दानिना तेन भूतले।
सुपात्रे दत्तवस्तुभ्यश्चित्तं यस्य निवर्तते॥ १०॥
अन्येधर्माः कष्टसाध्यास्तपोयज्ञादयः क्षितौ।
बहुश्रमेण सिद्ध्यन्ति मनोवाक्काय निग्रहात्॥ ११॥
सुखसाध्यं दानमेव सर्वधर्मेषु कीर्तितम्।
दीयते देयमुत्थाप्य हस्तेनेयान् श्रमास्त्विह॥ १२॥
दानमर्थस्य विद्याया अभयस्येति च द्विजाः।
इत्येवं त्रिविधं दानं मया पूर्वमुदीरितम्॥ १३॥

दूसरों को दिया जाता है, उसे दान कहते हैं और दानका यही सामान्य लक्षण है॥ ७॥ फिर भी दी हुई वस्तु से जो अपना मानसिक सम्बन्ध सब प्रकार से छोड़ देता है, वह दानियों में श्रेष्ठ है॥ ८॥ परन्तु चिरकाल से संलग्न चित्त के सम्बन्ध को छोड़ देना, यह कर्म अत्यन्त कठिन है ऐसा विद्वानों का मत है॥ ९॥ सुपात्र में दान की हुई वस्तु से जिसका चित्त हट जाय, उस दानी पुरुष को पृथ्वी पर जो कुछ साधना था, वह उसने साध लिया ऐसा जानना चाहिये॥ १०॥ पृथ्वी पर तप यज्ञादि जो अन्य धर्म हैं, वे अत्यन्त कष्ट साध्य हैं। जो अत्यन्त परिश्रम से मन, वाणी और शरीर का निग्रह करने पर साध्य होते हैं। परन्तु सब धर्मों में दान ही सहजसाध्य कहा गया है। क्योंकि इसमें देने की वस्तु हाथ उठा कर दे दी जाती है, केवल इतनाही श्रम होता है॥११-१२॥ हे द्विजों! अर्थ दान, विद्यादान और अभय दान इस प्रकार से त्रिविध दान होता है, यह मैं पहले कह चुका हूं॥ १३॥ जब सद्गुरु

भवत्यभयदानं तद् गुरुणा करुणावशात् ।
संसारभयनाशाय सम्यग् यदुपदिश्यते ॥ १४ ॥
संसारभयसन्त्रस्तजीवानामविभीपताम् ।
शक्ताः सद्गुरवस्तत्र भयं मुख्यं व्यपोहितुम् ॥ १५ ॥
यस्मात्सर्वेऽभयं दातुं नैव शक्ताः क्षितौ जनाः ।
तस्मादनुपयोगित्वाद्दानमेतदुपेक्ष्यते ॥ १६ ॥
विद्यादानञ्चार्थदानमालोच्येते ततोऽधुना ।
तत्र पूर्वं ब्रह्मदानापरपर्य्यायमुच्यते ॥ १७ ॥
कायेन मनसार्थेन विद्यावृद्धिमिहेच्छता ।
यद्दानं दीयते सम्यक् ब्रह्मदानं तदीर्य्यते ॥ १८ ॥
स्थापनं पाठशालानां महाविद्यालयस्य च ।
दुर्लभप्राक्तनानर्घ्यपुस्तकानां प्रकाशनम् ॥ १९ ॥
तथा विरचनं नव्यग्रन्थानामुपयोगिनाम् ।
दानञ्च पुस्तकादीनां विद्यार्थिभ्योऽथ पाठनम् ॥ २० ॥

करुणा युक्त होकर संसार का भयनाश करने के लिये उत्तम उपदेश करते हैं, तब उसे अभय दान कहते हैं ॥ १४ ॥ संसार भय से व्याकुल और अभय चाहनेवाले जीवों के मुख्य भय का नाश करने के लिये सद्गुरु ही समर्थ हैं ॥ १५ ॥ परन्तु पृथ्वीपर सभी लोग अभय दान देने में समर्थ नहीं हैं । अतः सर्व साधारण के पक्ष में इसकी विशेष उपयोगिता न होने के कारण इस दान के विषय में साधारणतः उपेक्षा की जाती है ॥१६॥ विद्यादान एवम् धन दान की यहाँ पर आलोचना की जाती है । दोनों में प्रथम विद्यादान है और इसी को ब्रह्मदान भी कहते हैं ॥ १७ ॥ काया, मन और धन द्वारा विद्यावृद्धि की इच्छा से जो दान दिया जाता है, उसे उत्तम ब्रह्मदान कहते हैं ॥ १८ ॥ पाठशाला और महाविद्यालयों की स्थापना करना, दुर्लभ और बहुमूल्य प्राचीन पुस्तकों को प्रकाश करना ॥ १९ ॥ नवीन उपयोगी ग्रन्थों का निर्माण करना, विद्यार्थियों को पुस्तकों का दान करना, पढ़ाना, सार्वजनिक कल्याण की बुद्धि से लेखन शैलियों का

४

एवं लेखनशैलीनां हितबुद्धया प्रवर्तनम् ।
ज्ञेयान्येतान्यपि ब्रह्मदानान्तर्भावितानि वै ॥ २१ ॥
हस्त्यश्वरथवस्त्रान्नकन्यारत्नावनीगृहम् ।
दीयते श्रद्धया यत्र चेतनाचेतनात्मकम् ॥ २२ ॥
धनैश्वर्यादिकं सर्वं दीयमानमथार्थिने ।
ऋषिभिः प्रोच्यते सम्यगर्थदानमिति स्फुटम् ॥ २३ ॥
सर्वाण्येतानि दानानि गुणत्रयविभागतः ।
प्रत्येकं त्रिविधानीह भवन्ति द्विजसत्तमाः ॥ २४ ॥
देशकालानुरोधेन पात्रायानुपकारिणे ।
अनीप्सितयशःसौख्यं दीयते तद्धि सात्त्विकम् ॥ २५ ॥
जनः कीर्तिफलाकाङ्क्षी तथा प्रत्युपकारधीः ।
यद्ददात्युपकर्त्रे च दानं तद्राजसं स्मृतम् ॥ २६ ॥
सद्देशकालपात्रादिज्ञानसन्मानवर्जितम् ।
सरोपकष्टं यद्दानं तत्तु तामसमुच्यते ॥ २७ ॥

प्रचार करना ये सभी बातें ब्रह्मदान के अन्तर्गत हैं, ऐसा जानना चाहिये ॥ २०-२१ ॥ हाथी, घोड़ा, गाड़ी, वस्त्र, अन्न, कन्या, रत्न, भूमि, घर आदि जो श्रद्धा से दिया जाता है अर्थात् चेतन या अचेतन धन ऐश्वर्य आदि जो कुछ याचक को दिया गया हो, उसे ऋषिगण स्पष्टतया उत्तम अर्थदान कहते हैं। २२-२३ ॥ हे द्विजश्रेष्ठों ! ये सभी दान तीन गुणों के भेद से प्रत्येक त्रिविध होते हैं ॥ २४ ॥ देशकाल का विचार कर, जिसका अपने ऊपर किसी प्रकार का उपकार न हुआ हो ऐसे पात्र में यश या सुख की इच्छा न रखकर दान दिया जाता है, वह सात्त्विक दान है ॥ २५ ॥ कीर्ति पानेकी इच्छा करनेवाले और उपकार का बदला चाहने की बुद्धि रखनेवाले लोग अपने उपकारी को जो दान देते हैं वह राजसिक दान है ॥ २६ ॥ और अच्छे देश, काल एवम् पात्र के ज्ञान से तथा सम्मान से रहित क्रोध पूर्वक या दुःख से जो दान दिया जाता है, उसको तामसिक दान कहते हैं ॥ २७ ॥ द्विजगण ! सात्त्विक दान से ही मुक्ति प्राप्त

सात्विकेनैव दानेन मुक्तिः सम्पद्यते द्विजाः।
राजसेन सुखैश्वर्य्यमिहामुत्र प्रपद्यते ॥ २८ ॥

तामसेनाश्नुते दुःखं कदाचिच्च्यवतेऽप्यधः।
तस्मादिदं विचार्य्यैव दानं सत्त्वगुणोर्जितम् ॥ २९ ॥

क्षुद्रवस्तुप्रदानादिकर्मसामान्यमात्रतः।
अहो मुक्तिः कथं सिद्ध्येद् दुर्लभा सा तु गीयते ॥ ३० ॥

इत्येवमनुयुञ्जीत संशयानोऽत्र कोपि चेत्।
तदेवं बोधनीयोऽसौ शास्त्रतत्त्वविचक्षणैः ॥ ३१ ॥

सम्पद्यते कर्मणैव मुक्तिः स्वाचरितेन वै।
सुनिर्णीतमिदं कर्ममीमांसायां यथायथम् ॥ ३२ ॥

कर्मैव दानमप्येतद्विश्वस्येत स्फुटं यदि।
यथावच्छास्त्रनिर्दिष्टरीत्यैवानुष्ठितञ्च चेत् ॥ ३३ ॥

तत्रापि सत्त्वसंजुष्टं तीव्रञ्चापि भवेद्यदि।
नूनं सम्प्रापयत्येव नरं मुक्तिं न संशयः ॥ ३४ ॥

होती है। राजसिक दान से इहलोक और परलोक में सुख एवम् ऐश्वर्य मिलता है। परन्तु तामसिक दान से तो दुःख ही होता है। यही नहीं किन्तु अधोगति भी प्राप्त होती है। अतः इन बातों का विचार कर सत्त्वगुण युक्त दान ही देना चाहिये॥ २८-२९॥ क्षुद्र वस्तु के दान जैसे साधारण कर्मसे भला मुक्ति कैसी प्राप्त हो सकती है, जो बड़ी दुर्लभ कही गई है॥ ३०॥ इस प्रकार का कोई सन्देह कर सकते हैं परन्तु शास्त्र तत्त्वों के जानने वालों को यह समझ लेना चाहिये कि अपने किये हुए कर्मों से ही मुक्ति मिलती है और यह बात कर्ममीमांसामें ठीक तौर से निश्चित की गई है॥ ३१॥ दान भी एक कर्म ही है, इस बात पर यदि ठीक विश्वास किया जाय और ठीक ठीक शास्त्रोक्त रीति से इसका अनुष्ठान हो और वह अनुष्ठान भी तीव्र सात्त्विक भाव से युक्त हो तो निःसन्देह ऐसा दान मनुष्य को मुक्ति प्राप्त करा सकता है॥ ३२-३४॥

मुक्तिदत्वे च धर्मस्य तदङ्गञ्चापि मुक्तिदम् ।
यस्यांशिनो हि यो धर्मः स तदंशेपि लभ्यते ॥ ३५ ॥
यथाग्नेर्दाहकत्वञ्चेद्गुणो लोकेऽवलोक्यते ।
तदा तस्य स्फुलिङ्गेपि प्रत्यासन्नः स वै गुणः ॥ ३६ ॥
सद्देशकालपात्रादिसाहाय्यञ्चेत्समश्नुते ।
दहत्येकः स्फुलिङ्गोऽपि वनमार्द्रमपि क्षणात् ॥ ३७ ॥
एवं धर्माङ्गमप्येकं दानञ्चेद्विधिना भवेत् ।
तदा तेनाप्यश्नुवीत नरो मुक्तिं न संशयः ॥ ३८ ॥
विज्ञेयं तत्त्वमत्रेदं सर्वशास्त्रार्थनिश्चितम् ।
सुगुप्तं सारभूतं च वक्ष्यमाणं मुनीश्वराः ॥ ३९ ॥
यावच्चित्तं मनुष्याणां विषयासक्तिमद्भवेत् ।
तावत्तद्वृत्तयश्चान्तःकरणं क्षोभयन्त्यलम् ॥ ४० ॥
यदा स्याद्विषयासक्तिर्विलीना सुतरामिह ।
विलीयन्ते तदाप्येषां वृत्तयश्चापि सर्वशः ॥ ४१ ॥

धर्म्म मुक्तिदाता होने से उसका अङ्ग भी मुक्तिदाता होगा; क्योंकि अंशीका जो धर्म होता है, वह उसके अंश में भी पाया जाता है। उदाहरण स्थलपर समझ सकते हैं कि अग्नि में दाह करने का जो गुण सर्वत्र देखा जाता है, वही गुण अग्निकी एक चिनगारी में भी रहता है। अच्छे देश, काल और पात्रकी यदि सहायता पा जाय तो वह एक ही चिनगारी हरे भरे वन को भी क्षणमात्र में भस्म कर देगी ॥ ३५-३७ ॥ इसी प्रकार से धर्म का एक ही अङ्ग दान, यदि विधि पूर्वक किया जाय, तो उससे भी मनुष्य निःसन्देह मुक्ति पा सकता है ॥ ३८ ॥ हे मुनीश्वरों ! अब मैं सब शास्त्रार्थों से निश्चित, बहुत गुप्त और सार स्वरूप जो तत्त्व कहूंगा, वह यहाँ पर जान लेने योग्य है ॥ ३९ ॥ जब तक मनुष्यों का चित्त विषयों में आसक्त रहता है तब तक उनकी वृत्तियाँ अन्तःकरण को क्षुब्ध करती हैं, और जब विषयासक्ति नष्ट हो जाती है, तब उनकी वृत्तियाँ भी विलीन हो जाती हैं। वृत्तियों का नाश होने से मनकी चंचलता क्षणमात्र में मिट जाती है और चंचलता मिटने से चित्त धारणा में

क्षीयते वृत्तिनाशे च चांचल्यं मनसः क्षणात्।
नष्टे च चापले चित्तं धारणायां प्रवर्तते ॥ ४२ ॥
तदेतदेव भगवान् योगशास्त्रे सदाशिवः।
आम्नातवाँ "श्चित्तवृत्तेर्निरोधो योग" इत्यथ ॥ ४३ ॥
आज्ञापयच्च मुदितः परमेण समाधिना।
"द्रष्टुः स्वरूपेऽवस्थानं तदा" स्यादिति चाग्रतः ॥ ४४ ॥
नूनमेतेन संसिद्धं यत्पुमान् शंसितव्रतः।
विषयात्मकवस्तुभ्यश्चित्तवृत्तीर्निवारयन् ॥ ४५ ॥
दद्याद्विषयभूतानि तानि वस्तूनि सर्वथा।
तदा निश्चापलं चेतः स्थिरतां लभते पराम् ॥ ४६ ॥
स्थिरेऽन्तःकरणे जाते स्याच्चैतन्यदर्शनम्।
तथात्वे च नरो मुक्तिं विन्दत्येव सदा स्थिराम् ॥ ४७ ॥
एवं चैकेनापि दानधर्मेणासाद्यते नरैः।
सुदुर्लभाऽपि सा मुक्तिः क्षुद्रास्ताः सिद्धयः किमु ॥ ४८ ॥
यद्येकं पणमप्यन्नमल्पं सात्त्विकभावतः।
सर्वदाऽनुभवं ह्यन्तः प्रणवस्य करोत्यलम्॥ ३६॥

बार भोजन करना चाहिये, बहूदक को मधुकरी * वृत्ति रखनी चाहिये। हंस की अजगर कीसी वृत्ति † होनी चाहिये और परमहंस को तो करपात्र ही शोभा देता है क्योंकि वह बाल-भावापन्न होकर बालक की तरह चेष्टा करता है॥ ३०-३१॥ कुटीचक को बाह्य पूजा, बहूदक को मानस पूजा और हंसको आत्म पूजा शुभ है। परमहंस तो स्वयं आत्माराम होते हैं॥३२॥ कुटीचक को मन्त्रयोग, बहूदक को हठयोग, हंसको लययोग और परमहंस को राजयोग के साधन करने की विधि है॥३३॥ अधिकार प्राप्त होने पर सभी सन्न्यासी चारों योगों का साधन कर सकते हैं, इसमें सन्देह नहीं है॥३४॥ कुटीचक संन्यासी ब्रह्मवाचक प्रणव का का वाचनिक जप करे, बहूदक उपांशु जपकरे, हंस मानसिक जपकरे और परमहंस तो देवताओं का भी ईश्वर होने के कारण वह

* कई स्थानों से थोड़ा थोड़ा मांग कर भिक्षा करने को माधुकरी वृत्ति कहते हैं।
† अपने स्थान में बैठकर अयाचित जो मिलजाय उसी के अनुसार भिक्षा करने को आजगरी वृत्ति कहते हैं।

कुर्य्यान्नाद्यो गुरोः कार्य्यं कुर्य्याच्चत्र वहूदकः ।
आचार्य्यकार्य्यं शास्त्रोपपत्तिकांशोपदेशनम् ॥ ३७ ॥
आचार्य्यस्य गुरोश्चाऽपि कार्य्यं कुर्य्यात्तृतीयकः ।
न विधिर्न निषेधश्च चतुर्थस्य कदाचन ॥ ३८ ॥
संत्यजेद्रूपोऽध्यासमाद्यः स्थूलस्य सर्व्वथा ।
द्वितीयः खलु सूक्ष्मस्य तृतीयः कारणस्य च ॥ ३९ ॥
सर्व्वथाऽयं पूजनीयो मार्गं विधिनिषेधयोः ।
अतीतः परमो हंसः प्राप्नोति ब्रह्मरूपताम् ॥ ४० ॥
रक्षेदाद्यः शिखासूत्रे द्वितीयः सूत्रमात्रकम् ।
शिखा तस्य जटायां हि सम्यक् परिणता भवेत् ॥ ४१ ॥
सूत्रशून्यो भवेद्धंसः स्वेच्छाऽधीनैव तज्जटा ।
न विधिर्न निषेधो वा चतुर्थस्य विधीयते ॥ ४२ ॥
अन्त्योऽग्रिमैस्त्रिभिः पूज्यस्तृतीय आद्ययोर्द्वयोः ।
द्वितीयोऽग्र्येण सम्पूज्यो भक्त्या कल्याणमिच्छता ॥ ४३ ॥

अन्तःकरण में निरन्तर प्रणव का अनुभव करता है । यही साधना उसके लिये पर्याप्त है ॥ ३५-३६ ॥ कुटीचक गुरु का कार्य न करे । वहूदक शास्त्रों के औपपत्तिक अंश का उपदेश कर आचार्य का कार्य करे । आचार्य का और गुरु का दोनों का कार्य हंस करे और परमहंस को किसी प्रकार का विधिनिषेध नहीं है ॥ ३७-३८ ॥ कुटीचक स्थूल शरीर का सर्वथा अध्यास छोड़ दे । वहूदक सूक्ष्म शरीर का और हंस कारण शरीर का अध्यास छोड़ दे । परमहंस विधि निषेध से अतीत होने के कारण सर्वथा पूजनीय है । वह ब्रह्म स्वरूप को प्राप्त होजाता है ॥ ३९-४० ॥ कुटीचक शिखा सूत्र धारण करे । वहूदक केवल सूत्र मात्र धारण करे क्योंकि शिखा उसकी जटा में ही उत्तम रीति से परिणत हुई होती है । हंस को सूत्र भी त्याग देना चाहिये और जटा रखना न रखना उसकी इच्छा पर अवलंबित है, परमहंस के लिये कोई विधि निषेध नहीं है ॥४१-४२॥ परमहंस सन्न्यासी कल्याण चाहने वाले प्रथम तीन सन्न्यासियों के लिये भक्तिपूर्वक पूजनीय है । हंस सन्न्यासी शेष दो प्रकार के

सर्वे संन्यासिनः पूज्या वर्णैराश्रमिभिस्तथा ।
संन्यासिनमविज्ञातं वचसैव नमेत्सुधीः ॥ ४४ ॥
कालतो हीनवर्णोऽपि सन्न्यासिवेषभाक् यतः ॥
प्रणामे कायिके सम्यक् दोषोऽत्र विद्यते खलु ॥ ४५ ॥
नमस्कारे वाचनिके न दोषोऽस्ति कथंचन ।
व्रतं त्रयाणामाद्यानां प्रत्येकं तु त्रिवत्सरम् ॥ ४६ ॥
व्रते पूर्णेऽधिकारे च लब्धे गुरुदयाबलात् ।
आद्यो द्वितीयो भवितुं द्वितीयस्तु तृतीयकः ॥ ४७ ॥
एवं तृतीयश्चरमः शक्नोति योग्यतां गतः ।
आध्यात्मिकाऽधिकारस्य न कश्चित्पूर्णतां विना ॥ ४८ ॥
प्राप्नुयादुन्नतिं तत्र गुरुदेवः परीक्षकः ॥
प्राणहीनः स्थूलदेहमाद्यस्य दहनं व्रजेत् ॥ ४९ ॥
दहनं क्षेपणं वाऽपि द्वितीयस्याऽनले जले ।
नद्यां क्षेपं तृतीयस्य क्षित्यन्तर्वा निवेशनम् ॥ ५० ॥

सन्न्यासियों के लिये पूजनीय है और बहूदक कुटीचक के लिये पूजनीय है ॥ ४३ ॥ सब वर्ण और आश्रमों द्वारा सभी संन्यासी पूजनीय हैं । बुद्धिमान् मनुष्य अपरिचित संन्यासी को केवल वाचनिक प्रणाम करे क्योंकि कलिके प्रभाव से हीनवर्ण के लोग भी संन्यासी का वेश धारण करलेते हैं । उनको कायिक प्रणाम करने से दोष होता है ॥ ४४-४५ ॥ वाचनिक नमस्कार में दोष नहीं होता । कुटीचक, बहूदक और हंस इनमें से प्रत्येक का व्रत तीन तीन वर्षका होता है । व्रत पूर्ण होने पर और गुरु कृपासे अधिकार प्राप्त होने पर कुटीचक बहूदक हो सकेगा, बहूदक हंस बन सकेगा ॥ ४६-४७ ॥ और हंस योग्यता प्राप्त कर परम हंस हो सकेगा । आध्यात्मिक अधिकार की पूर्णता हुए विना कोई उन्नति को नहीं पहुँच सकता और इसके परीक्षक केवल गुरुदेव ही हो सकते हैं । कुटीचक का स्थूल देह प्राणहीन हो जाने पर उसे जला देना चाहिये ॥ ४८-४९ ॥ बहूदक का मृतदेह अग्नि में जलाया जा सकता है या जल में फेक भी दिया जा सकता है । हंस के मृत शरीर को

चतुर्थस्य विशेषो न नियमोऽस्त्यत्र कश्चन ॥
सन्न्यासिगुरुदेवस्य सन्निधाने कुटीचकः ॥ ५१ ॥
स्पृष्ट्वोपनिषद्ग्रन्थं गृह्णीयाद्भक्तितो व्रतम् ।
बहूदकस्तु सन्न्यासी गुरुदेवस्य सन्निधौ ॥ ५२ ॥
स्पृष्ट्वा तीर्थजलं सम्यक् गृह्णीत व्रतमुत्तमम् ।
नारायणस्वरूपं तु स्पृष्ट्वा होमानलं स्वयम् ॥ ५३ ॥
गृह्णीयाद्धंससन्न्यासी व्रतं परमभद्रदम् ।
परः परमहंसोऽस्त्यावतीतद्वैतभावनः ॥ ५४ ॥
आत्मतत्त्वं स्वयं स्मृत्वा गृह्णीयात्परमं व्रतम् ।
दृष्टाऽऽनुश्रविकैश्वर्य्यमूर्द्ध्वलोकादिकञ्च यत् ॥ ५५ ॥
कुटीचकस्तु मंत्रेण तत्सर्व्वं साधु सन्त्यजेत् ।
त्यजेत्तदुक्तमखिलं सङ्कल्पेन बहूदकः ॥ ५६ ॥
हंसो भवेत्सर्व्वथैव तत्तत्संस्कारवर्जितः ।
सन्न्यासी परमो हंसः सर्व्वेषां भक्तिभाजनम् ॥ ५७ ॥
ब्रह्मस्वरूपस्तत्तस्य क्व निषेधः क्व वा विधिः ।
प्रवृत्तिश्च निवृत्तिश्च द्वौमार्गावेव तिष्ठतः ॥ ५८ ॥

नदी में बहादेना या पृथ्वी में गाड़ देना चाहिये ॥ ५० ॥ परमहंस के लिये कोई विशेष नियम नहीं है । कुटीचक सन्न्यासी गुरुदेव के निकट उपनिषद्-ग्रन्थ को छूकर भक्ति के साथ व्रत ग्रहण करे। बहूदक गुरुदेव के निकट जाकर तीर्थजल को स्पर्श कर व्रत धारण करे। स्वयं नारायण स्वरूप होमानल को स्पर्श कर हंस सन्न्यासी परम कल्याणकारी व्रत ग्रहण करे । परमहंस द्वैतभाव से अतीत होता है ॥ ५१-५४ ॥ आत्मतत्त्व का स्मरण कर वह स्वयम् परम व्रत को ग्रहण करे । दृष्ट अर्थात् इह लौकिक ऐश्वर्य और आनुश्रविक अर्थात् स्वर्गलोक के ऐश्वर्य एवम् ऊर्ध्वलोकादि के ऐश्वर्य का कुटीचक मन्त्र द्वारा त्याग करे और वही सब बहूदक सङ्कल्प द्वारा त्याग दे ॥ ५५-५६ ॥ हंसको सर्वथा उसके संस्कारों से भी रहित होना चाहिये और परमहंस सन्न्यासी तो सब का भक्तिभाजन है । वह स्वयं ब्रह्म स्वरूप होने से उसके लिये न कोई विधि है और न कोई

निवृत्तिमेवाश्रयेरन् सर्व्वे सन्न्यासिनः सदा।
कलिप्रभावतो नूनं वर्णाश्रमविपर्य्ययात् ॥ ५९ ॥
इतरेऽप्याश्रयिष्यन्ते निवृत्तिमार्गमुत्तमम् ॥
अन्तश्चतुर्णामेतेषां प्रवेष्टुं यद्यपि क्षमाः ॥ ६० ॥
नैव स्युस्तथाऽप्येते निवृत्तिमार्गगामिनः।
अत एवाऽवधूतेति गोस्वामीति च साध्विति ॥ ६१ ॥
उदासीनेति वैरागीति महापुरुषेति च।
एतत्पर्य्यायकैरन्यैरपि शब्दैर्निरन्तरम् ॥ ६२ ॥
प्रकीर्त्यन्ते यतस्तेऽत्र साधुमार्गावलम्बिनः।
त्यागस्य तपसश्चाऽपि ज्ञानस्य तारतम्यतः ॥ ६३ ॥
सम्माननस्याऽपि तेषां तारतम्यं सुविद्यते।
विशेषतस्तारतम्याद्वर्णाधिकारयोरपि ॥ ६४ ॥
तारतम्यं भवेत्तेषां निवृत्तिमार्गवर्त्तिनाम्।
साधवः स्वोच्चवर्णीयान् कुर्वीरन् नैव दीक्षितान् ॥ ६५ ॥
प्रणामं कायिकं तेषां गृह्णीरंश्च कदापि नो।
वर्णानामाश्रमाणाञ्च परमोन्नतिसाधिनी ॥ ६६ ॥

निषेध ही है। प्रवृत्ति और निवृत्ति ये दोही मार्ग हैं ॥ ५७-५८ ॥ इनमें से संन्यासियों को निवृत्तिमार्ग का ही आश्रय करना चाहिये। कलिके प्रभाव से वर्णाश्रम का विपर्यास होने के कारण इस उत्तम निवृत्तिमार्गका ब्राह्मणेतरवर्ण भी आश्रय करेंगे। यद्यपि वे इन चारों में अर्थात् कुटीचक, बहूदक, हंस, परमहंसों में प्रवेश करने में असमर्थ हैं, तथापि वे निवृत्ति मार्ग गामी हैं। अतएव वे अवधूत, गोस्वामी, साधु, उदासी, वैरागी, महापुरुष या इन्हीं के पर्यायवाचक शब्दों से निरन्तर अभिहित होंगे। क्योंकि वे साधुमार्गावलम्वी हैं। त्याग, तप और ज्ञान के तारतम्य से ॥ ५९-६३ ॥ उनके सम्मान में भी तारतम्य रहेगा। विशेषतः वर्ण और अधिकार के तारतम्यानुसार उन निवृत्ति मार्गावलम्बियों का तारतम्य रहेगा। साधु लोग अपने से उच्च वर्ण के लोगों को दीक्षित न करें ॥ ६४-६५ ॥ उनका कायिक प्रणाम कभी ग्रहण न करें। ऐसा करने से वर्णाश्रम की परम उन्नति

अन्यथा धर्म्ममर्य्यादाऽनादिसिद्धाऽपि नङ्क्ष्यति।
उदासीना वा भवन्तु ब्राह्मणेतरवर्णजाः॥ ६७॥

त्यागशीला वा भवन्तु रक्षेत नियमो हि तैः।
अवश्यं धर्म्ममर्य्यादा पालनीया प्रयत्नतः॥ ६८॥

कार्य्यं देवर्षिपितॄणां तैः सम्मानसुरक्षणम्॥
यत्नो विधेयः सर्वत्र सर्व्वेषां सर्व्वदा स्वतः॥ ६९॥

भगवन्महिमप्रेम्णोः कीर्त्तने च प्रचारणे।
कर्म्मण्युपास्तौ भक्तौ च रतानामधिकारिणाम्॥ ७०॥

जनयेयुर्बुद्धिभेदं न ते ज्ञानाऽभिमानिनः।
परन्तु तेषां सततमधिकारोऽधिकारिणाम्॥ ७१॥

शक्नोति वर्द्धितुं येन विधेया तत्र सम्मतिः।
महर्षयोहमधुना निवृत्त्याश्रयवर्त्तिनां॥ ७२॥

सन्न्यासिनां शुभकरं साधनं प्रब्रवीमि वः।
निष्कामकर्म्माभ्यसनं कार्य्यं स्वस्वाऽधिकारतः॥ ७३॥

साधिनी अनादिसिद्ध धर्ममर्यादा नष्ट हो जायगी। ब्राह्मणेतर वर्ण चाहे तो उदासी हों॥६६-६७॥ चाहे त्यागी हों, लोकहितकारी वर्णाश्रम धर्मसम्बन्धीय नियमों की रक्षा उन्हें करनी उचित है। उन्हें बड़े यत्न के साथ धर्म की मर्यादा अवश्य पालन करनी चाहिये॥६८॥ और देव, ऋषि एवम् पितरों के सम्मान की सुरक्षा का कार्य करना चाहिये। भवन्महिमा और भगवत्प्रेम के कीर्तन और प्रचार में सदा सर्वत्र स्वयं और दूसरों के द्वारा उन्हें यत्नवान् होना चाहिये। वे ज्ञानाभिमानी होकर कर्म, उपासना और भक्ति में रत अधिकारियों का बुद्धिभेद न करें। किन्तु उनके साथ ऐसी सहानुभूति रक्खें जिससे अधिकारियों का अपना अपना यथावत् अधिकार बढ़ सके। हे महर्षिगण! अब मैं निवृत्ति मार्ग का आश्रय किये हुए सन्न्यासियों के कल्याणकारी साधन को कहता हूं। सन्न्यासियों को अपने अपने अधिकारानुसार निष्काम कर्म का अभ्यास करना चाहिये॥६९-७३॥

उपासना यथाशक्ति तेषां परमश्रद्धया।
शक्यतेऽहरहः सम्यङ् ज्ञानं वर्द्धयितुं यथा॥ ७४॥
मोक्षशास्त्रादिपाठेन क्रियेतैश्च तथैव तैः।
तपोज्ञानविवृद्धानां देवतानाञ्च पूजनम्॥ ७५॥
सम्माननं देवमूर्त्तिपीठानां कुर्य्युरेव ते।
अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विजः॥ ७६॥
यतो ह्यनाश्रमी तिष्ठन् पतत्येव न संशयः।
अतो गार्हस्थ्यभावेऽपि वैराग्यं समुपागतः॥ ७७॥
तथा गृहस्थधर्म्मस्य पालने चाऽक्षमः पुमान्।
शास्त्रदृष्टेन विधिना ह्याश्रमान्तरमाविशेत्॥ ७८॥
विप्रो वनाश्रमे स्थित्वा तृतीयं भागमायुषः।
चतुर्थमायुषो भागं सन्न्यासेन नयेत् क्रमात्॥ ७९॥

और परम श्रद्धा के साथ यथाशक्ति उपासना भी करनी चाहिये। प्रतिदिन मोक्षशास्त्र आदि के पाठ से वे अपना ज्ञान भली भांति बढ़ावें और तदनुसार आचरण भी उन्हें करना चाहिये। तप एवं ज्ञान में जो वृद्ध हैं, उनका और देवताओं का पूजन तथा देवमूर्त्तियों के पीठों का सम्मान उन्हें करना चाहिये। द्विज को कभी एक क्षण के लिये भी अनाश्रमी नहीं रहना चाहिये * ॥ ७४-७६ ॥ क्योंकि अनाश्रमी रहने से वह पतित होगा, इसमें कोई सन्देह नहीं। अतः गृहस्थाश्रम में रहते हुए यदि वैराग्य प्राप्त हो या कोई गृहस्थधर्म-पालन में असमर्थ हो तो शास्त्रोक्त विधि से ही आश्रमान्तर ग्रहण करना चाहिये ॥ ७७-७८ ॥ ब्राह्मण अपने आयुष्य का तृतीय भाग वानप्रस्थाश्रम में बिताकर क्रमशः जीवन का चतुर्थ भाग सन्न्यासाश्रम में बितावें ॥ ७९ ॥

---

* आर्यजाति के स्वाभाविक नेता ब्राह्मण वर्ण में उत्पन्न व्यक्ति को कदापि अनाश्रमी होकर एक क्षण भी नहीं रहना चाहिये। या तो वह ब्रह्मचारी रहे, या गृहस्थ रहे, या वानप्रस्थ रहे या सन्न्यासी होजाय। अनाश्रमी होकर रहने से उसकी अवश्य अवनति होगी, यह महर्षियों का सिद्धान्त है।

आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।
भिक्षावलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्द्धते ॥ ८० ॥
अग्नीनात्मनि संस्थाप्य विप्रः प्रव्रजितो भवेत् ।
योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः ॥ ८१ ॥
यदा मनसि सम्पन्नं वैतृष्ण्यं सर्ववस्तुषु ।
तदा सन्न्यासमिच्छेत्तु पतितः स्याद्विपर्य्यये ॥ ८२ ॥
प्राजापत्यां निरूप्येष्टिं आग्नेयीमथवा पुनः ।
दान्तः पक्वकषायोऽसौ ब्रह्माश्रममुपाश्रयेत् ॥ ८३ ॥
सदन्ने वा कदन्ने वा लोष्ठे वा काञ्चने तथा ।
समबुद्धिर्यस्य शश्वत् स सन्न्यासीति कीर्तितः ॥ ८४ ॥
शुद्धाचारद्विजान्नञ्च भुङ्क्ते लोभादिवर्जितः ।
किन्तु किञ्चिन्नयाचेत स सन्न्यासीति कीर्तितः ॥ ८५ ॥
अयाचितोपस्थितञ्च मिष्टामिष्टञ्च भुक्तवान् ।
भक्षणार्थी न याचेत स सन्न्यासीति कीर्तितः ॥ ८६ ॥

एक आश्रम से दूसरे आश्रम में जाकर, अग्निहोत्रादि सम्पन्न कर, जितेन्द्रिय और भिक्षा एवम् बलि से परिश्रान्त होकर अन्त में जो संन्यास ग्रहण करता है उसकी देह छूटने पर अवश्यही आध्यात्मिक उन्नति होती है ॥ ८० ॥ अग्नि को आत्मामें स्थापन कर ब्राह्मण को सन्न्यासी होना चाहिये। योगाभ्यासनिरत, शान्त और ब्रह्मविद्या में परायण होकर जब मन में सब वस्तुओं से विराग हो जाय तब सन्न्यास की इच्छा करनी चाहिये। इसका विपर्यय होने से वह पतित हो जाता है ॥ ८१-८२ ॥ प्राजापत्येष्टि अथवा आग्नेयी इष्टि कर दमशील होकर और वासनाओं का क्षय करके ब्रह्माश्रम अर्थात् सन्न्यासाश्रम का आश्रय करना चाहिये ॥ ८३ ॥ सुस्वादु अथवा नीरस अन्न में, पत्थर या सोने में जिसकी निरन्तर समबुद्धि रहे वही सन्न्यासी है ॥ ८४ ॥ जिसका आचार शुद्ध हो ऐसे द्विज का अन्न लोभादि छोड़कर जो सेवन करता है और कुछ भी याचना नहीं करता, वह सन्न्यासी है ॥ ८५ ॥ बिना मांगे मीठा कडुवा जो कुछ सामने आजाय उसको खाकर भोजन की जो कभी याचना नहीं

सर्व्वत्र समबुद्धिश्च हिंसामायाविवर्जितः ।
क्रोधाहङ्काररहितः स सन्न्यासीति कीर्त्तितः ॥ ८७ ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥ ८८ ॥

यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् स दमसम्पन्नः स योगी भिक्षुरुच्यते ॥ ८९ ॥
भैक्ष्यं श्रुतञ्च मौनित्वं तपो ध्यानं विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्म्मोऽयं भिक्षुके मतः ॥ ९० ॥

योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥ ९१ ॥
प्रथमा भावना पूर्व्वे मोक्षे त्वक्षरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥ ९२ ॥

यतीनां यतचित्तानां न्यासिनामूर्ध्वरेतसाम् ।
आनन्दं ब्रह्म तत्स्थानं यस्मान्नावर्त्तते मुनिः ॥ ९३ ॥

करता, वही सन्न्यासी है ॥ ८६ ॥ जिसकी सर्वत्र समबुद्धि हो, जो हिंसा, माया, क्रोध, अहङ्कार से रहित हो, वही सन्न्यासी है ॥ ८७ ॥ जो पूर्ण तपस्वी और ध्यानपरायण है, वानप्रस्थाश्रम में रहने पर भी उसे सन्न्यासी ही जानना चाहिये ॥ ८८ ॥ जो आत्मा में रत, नित्य तृप्त और दमसम्पन्न है, वह महामुनि, योगी, भिक्षु कहा जाता है ॥ ८९ ॥ भिक्षावृत्ति, शास्त्राध्यायन में प्रवृत्ति, मनोनिग्रह, तप, ध्यान, उत्तमज्ञान और विशेषतः वैराग्य येही भिक्षु के धर्म हैं ॥ ९० ॥ योगी तीन प्रकार के होते हैं यथा (१) भौतिक योगी (२) मोक्ष योगी और (३) अन्त्याश्रमी योगी, जो योग मूर्ति स्वरूप हैं ॥ ९१ ॥ पहिले की प्रथमा भावना, दूसरे (मोक्ष योगी) की अक्षर भावना और तीसरे (अन्त्याश्रमी) की पारमेश्वरी भावना होती है ॥ ९२ ॥ ऐसे अन्त्याश्रमी यतचित्त ऊर्ध्वरेता सन्न्यासी यतियों के ब्रह्मानन्द का वही स्थान-परमपद-है, जहां से वे मुनि लौट

योगिनाममृतं स्थानं व्योमाख्यं परमाक्षरम् ।
आनन्दमैश्वरं यस्मान्मुक्तो नावर्त्तते नरः ॥ ९४ ॥
ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनोऽपरे ॥
कर्म्मसन्न्यासिनस्त्वन्ये त्रिविधाः परिकीर्तिताः ॥ ९५ ॥
यः सर्व्वसङ्गनिर्मुक्तो निर्द्वन्द्वश्चाऽपि निर्भयः ।
प्रोच्यते ज्ञानसन्न्यासी स्वात्मन्येव व्यवस्थितः ॥ ९६ ॥
वेदमेवाऽभ्यसेन्नित्यं निराशीर्निष्परिग्रहः ।
प्रोच्यते वेदसन्न्यासी मुमुक्षुर्विजितेन्द्रियः ॥ ९७ ॥
यस्त्वग्नीनात्मसात् कृत्वा ब्रह्मार्पणपरो द्विजः ।
ज्ञेयः स कर्म्मसन्न्यासी महायज्ञपरायणः ॥ ९८ ॥
त्रयाणामपि चैतेषां ज्ञानी त्वभ्यधिको मतः ।
न तस्य विद्यते कर्म्म न लिङ्गाद्या विपश्चितः ॥ ९९ ॥

नहीं आते ॥ ९३ ॥ योगियों के लिये अमृत, व्योमाख्य, परमाक्षर, आनन्दरूप और ईश्वरसम्बन्धीय वह स्थान है, जहां से मुक्त पुरुष पुनः लौट कर नहीं आता ॥ ९४ ॥ तीन प्रकार के सन्न्यासी होते हैं । यथा–ज्ञानसन्न्यासी, वेदसन्न्यासी और कर्मसन्न्यासी ॥९५॥ जो अपने आत्मा में ही रममाण, सर्वसङ्गरहित, निर्द्वन्द्व और निर्भय है, उसे ज्ञानसन्न्यासी कहते हैं ॥ ९६ ॥ जो जितेन्द्रिय मुमुक्षु किसी से कुछ नहीं लेता, आशा नहीं रखता और नित्य वेद पाठ ही किया करता है वह वेद सन्न्यासी कहाता है ॥ ९७ ॥ जो द्विज अग्नि को आत्मसात् कर ब्रह्मार्पण परायण है, वह महायज्ञ परायण कर्मसन्न्यासी जनाना चाहिये * ॥ ९८ ॥ इन तीनों में ज्ञानी सन्न्यासी ही सबसे श्रेष्ठ है । क्योंकि न उसे कोई कर्म है और न चिन्हादिकी ही अपेक्षा है ॥ ९९ ॥ वह मरण नहीं

* सन्न्यासी की अवस्था के ये तीन भेद विचारने योग्य हैं । केवल कर्मकाण्ड की सहायता से वहिरग्नि का आत्मा में समारोप करने से कर्मसन्न्यासी होता है । सर्वत्यागी व्यक्ति अर्थात् अन्तःकरण से त्याग होकर जिसको वैराग्य होगया है वह द्वितीय अवस्था है और आत्मज्ञानी सन्न्यासी सर्वोत्तम है ।

नाभिनन्देत मरणं नाऽभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥ १०० ॥
नाऽध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ।
एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते ॥ १०१ ॥

एकवासोऽथवा विद्वान् कौपीनाच्छादनोऽथवा ।
मुण्डः शिखी वाऽथ भवेत् त्रिदण्डी निष्परिग्रहः ॥ १०२ ॥
काषायवासाः सततं ध्यानयोगपरायणः ।
ग्रामान्ते वृक्षमूले वा वासं देवालयेऽपि वा ॥ १०३ ॥

समः शत्रौ तथा मित्रे तथा मानापमानयोः ।
भैक्ष्येण वर्त्तयेन्नित्यं नैकान्नादी भवेत् क्वचित् ॥ १०४ ॥
" यस्तु मोहेन चाऽन्यस्मादेकान्नादी भवेद् यदि ।
न तस्य निष्कृतिः काचिद् धर्मशास्त्रेषु कथ्यते " ॥१०५॥

रागद्वेषविमुक्तात्मा समलोष्टाश्मकाञ्चनः ।
प्राणिहिंसानिवृत्तश्च मौनी स्यात्सर्वनिस्पृहः ॥ १०६ ॥

चाहता और जीना भी नहीं चाहता । वह आज्ञाधारी सेवक की तरह केवल काल की प्रतीक्षा करता रहता है ॥ १०० ॥ बन्धन करनेवाले शास्त्र पढ़ना, बोलना, सुनना उसके लिये कुछ नहीं है । ऐसा ज्ञान परायण योगी ब्रह्मत्व को प्राप्त करता है ॥ १०१ ॥ वह विद्वान् एक वस्त्र परिधान करे वा कौपीन ही धारण करे, चाहे मुण्डन करादे या शिखा ही रखाले, त्रिदण्ड ग्रहण करे अथवा कुछ भी न ले । काषायवस्त्रधारी, निरन्तर ध्यानयोग में परायण, गांव के बाहर वृक्ष के नीचे अथवा किसी देवालय में जिसका वास हो ॥ १०२ – १०३ ॥ शत्रु मित्र और मान अपमान को जो समान समझता हो, जो भिक्षा कर जीवन बिताता हो और एक ही का अन्न न खाता हो (यदि मोह से किसी एक ही का अन्न खाने वाला वह हो जाय तो धर्मशास्त्र में उसके लिये कोई निष्कृति नहीं है) रागद्वेष से रहित, पत्थर और सोने को एकसाँ समझनेवाला, प्राणि हिंसा से

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥ १०७ ॥
दम्भाहङ्कारनिर्मुक्तो निन्दापैशून्यवर्जितः ।
आत्मज्ञानगुणोपेतो यतिर्मोक्षमवाप्नुयात् ॥ १०८ ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं तपः परम् ।
क्षमा दया च सन्तोषो व्रतान्यस्य विशेषतः ॥ १०९ ॥
चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ ।
हंसः परमहंसश्च योऽत्र पश्चात्स उत्तमः ॥ ११० ॥

इति श्रीसन्न्यासगीतायां सन्न्यासधर्म्मनिरूपणं नाम षष्ठोऽध्यायः।

शुक उवाच ।

परिव्राजकमूर्द्धन्य ! प्रभो सन्न्यासिनां गुरो ।
श्रुतोऽस्माभिश्चतुर्णां हि धर्म्मः साधारणोऽनघ ! ॥ १ ॥

निवृत्त, मन को दमन करनेवाला, इच्छारहित, देखकर चलने वाला, छानकर जल पीने वाला, सत्य बोलनेवाला, मन से पवित्राचरण करनेवाला, दम्भ, अहङ्कार, निन्दा, दुष्टतादि से रहित, आत्म ज्ञान के गुण से युक्त जो यति हो, वह मोक्षप्राप्त करता है॥१०४-१०८॥ ऐसे यति के अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य, तप, क्षमा, दया और सन्तोष ये व्रत हैं ॥ १०९ ॥ चार प्रकार के भिक्षु होते हैं। यथाः- कुटीचक, बहूदक, हंस और परमहंस-इनमें उत्तरोत्तर श्रेष्ठ माने गये हैं ॥ ११० ॥

इस प्रकार श्रीसन्न्यासगीता का संन्यासधर्मनिरूपण नामक षष्ठाध्याय समाप्त हुआ।

श्री शुकदेवजी बोलेः-हे निष्पाप ! हे परिव्राजक श्रेष्ठ ! हे सन्न्यासियों के गुरु ! हे प्रभो ! हमने चारों प्रकार के सन्न्यासियों

सन्न्यासिनां महाभाग ! कृपया श्रावयस्व नः।
कुटीचकस्य यः शास्त्रे विशिष्टो धर्म्म ईरितः ॥ २ ॥
पद्धतिर्या च सन्न्यासग्रहणे सम्मता सताम् ॥ ३ ॥

याज्ञवल्क्य उवाच ।

मुमुक्षुः सत्युपरते गार्हस्थ्याच्चेतसि ध्रुवम् ।
वानप्रस्थं समाश्रित्य त्यागे पूर्णरुचिस्तथा ॥ ४ ॥
साधने योग्यतां लब्ध्वा सन्न्यासाश्रममाविशेत् ।
यद्वा विषयवैतृष्ण्यमात्मज्ञानार्ज्जने तथा ॥ ५ ॥
उत्कटेच्छा प्रजायेत तदैव प्रव्रजेत्सुधीः ।
यतो वै प्राणिनां लोके गतिर्भाविन्यनिश्चिता ॥ ६ ॥
कुटीचकानां लक्ष्यं तु वक्ष्यमाणं निशामय ।
विषयवासनात्याग इन्द्रियाणाञ्च संयमः ॥ ७ ॥
दृष्टानुश्रविकाणां हि विषयाणां विशेषतः ।
त्यागसङ्कल्प आख्यातः सकामस्य च कर्म्मणः ॥ ८ ॥

का साधारण धर्म सुनलिया ॥ १ ॥ अब हे महाभाग ! कुटीचक सन्न्यासियों का शास्त्र में जो विशिष्ट धर्म कहा है, उसे सुनाइये ॥२॥ और सन्न्यास ग्रहण की सज्जन सम्मत पद्धति का भी वर्णन कीजिये ॥३॥

महर्षि याज्ञवल्क्य ने कहा:-जब मुमुक्षु के चित्त में गृहस्थाश्रम से सच्ची उपरति हो जाय और जब वह वानप्रस्थाश्रम का आश्रय कर पूर्ण त्यागी बन जाय एवम् जब वह साधन में योग्यता प्राप्त करले, तब उसे सन्न्यासाश्रम में प्रवेश करना चाहिये। अथवा विषयों से विरक्ति और आत्मज्ञान प्राप्ति की उत्कट इच्छा जब हो, तभी बुद्धिमान् मनुष्य को सन्न्यास ग्रहण कर लेना चाहिये। क्योंकि संसार में प्राणियों की अनिश्चित गति हुआ करती है ॥ ४-६ ॥ अब कुटीचकों का लक्ष्य कहता हूं, सुनिये। विषयवासना का त्याग, इन्द्रियों का संयम, विशेषतया दृष्ट और आनुश्रविक विषयों का सङ्कल्प त्याग,

त्यागस्तथा गृहस्थानां वानप्रस्थगतस्य च ।
धर्म्मस्य त्यागः कथितो देहाध्यासनिवारणे ॥ ९ ॥
तथा प्रयत्नो बहुधा सर्व्वकर्म्मस्वपि ध्रुवम् ।
आत्मनैव समं योगो योगसाधनमेव च ॥ १० ॥
पराभक्तेस्तथा लाभस्तत्त्वज्ञानागमश्च ह ।
विषयेषु च वैराग्यं सन्न्यासे तीव्रकाङ्क्षिता ॥ ११ ॥
यदा जायेत विप्रस्य तदैव प्रव्रजेद् गृहात् ।
कस्यचिदुपयुक्तस्य गुरोः सन्न्यासिनोऽन्तिके ॥ १२ ॥
बद्धाञ्जलिर्नतशिरा दीक्षामभ्यर्थयेत् स्वयं ।
इत्थं कुटीचकव्रतं प्रार्थयित्वा द्विजोत्तमः ॥ १३ ॥
प्रसाद्य देवर्षिपितॄन् देशे काले गुणान्विते ।
आकाङ्क्षेत ततो धीरः सन्न्यासव्रतधारणम् ॥ १४ ॥
कामिनीकाञ्चनत्यागो यावज्जीवनधारणम् ।
निष्कामकर्मणोऽभ्यासो गुरौ भक्तिर्निरन्तरा ॥ १५ ॥
ब्रह्मणि च पराभक्तिस्तत्त्वज्ञानावलम्बनात् ।
अद्वैतभावनासिद्धिरेतत्सर्वं समासतः ॥ १६ ॥

सकाम कर्म त्याग ॥ ७-८ ॥ गृहस्थों के और वानप्रस्थों के धर्मों का त्याग, सब कर्म्मों के करने में देहाध्यास निवारण के लिये बहुधा निश्चित रूप से प्रयत्न, आत्मा के साथ योग, योगसाधन, पराभक्ति का लाभ, तत्त्वज्ञान की प्राप्ति, विषयों में वैराग्य और सन्न्यास की तीव्र आकाङ्क्षा ये सब बातें जब हों, तभी ब्राह्मण को घर से निकल जाना चाहिये । फिर किसी उपयुक्त सन्न्यासी के निकट जाकर ॥ ९-१२ ॥ हाथ जोड़ सिर झुकाकर दीक्षा के लिये प्रार्थना करनी चाहिये । इस प्रकार कुटीचकव्रत के लिये प्रार्थना कर और अच्छे देशकाल में देव, ऋषि और पितरों को सन्तुष्ट कर उस धीर द्विजश्रेष्ठ को सन्न्यास व्रत धारण करने की इच्छा करनी चाहिये ॥ १३-१४ ॥ आजन्म कामिनी काञ्चन का त्याग, निष्काम कर्म्मों का अभ्यास, निरन्तर गुरुभक्ति, ब्रह्म की पराभक्ति, तत्त्वज्ञान

सन्न्यासदीक्षाग्रहणे प्रधानं लक्ष्यमीरितम् ।
आतुरस्य तु सन्न्यासे विशेषः कोऽपि नो विधिः ॥ १७ ॥
अल्पान्नाऽभ्यवहारेण रहस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ १८ ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ १९ ॥
दह्यन्तेध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ २० ॥
प्राणस्योत्क्रमणासन्नकालस्त्वातुरसंज्ञिकः ।
नेतरस्त्वातुरः कालो मुक्तिमार्गप्रवर्तकः ॥ २१ ॥
आतुरेपिच सन्न्यासे तत्तन्मन्त्रपुरःसरम् ।
मन्त्रावृत्तिञ्च कृत्वैव सन्न्यसेद्विधिवद्बुधः ॥ २२ ॥
आतुरेऽपि क्रमे वाऽपि प्रेषभेदो न कुत्रचित् ।
न मन्त्रः कर्मरहितः कर्म मन्त्रमपेक्षते ॥ २३ ॥

के अवलम्बन से अद्वैत भावना की सिद्धि, यही सब सन्न्यास दीक्षा ग्रहण में प्रधान लक्ष्य कहे गये हैं। आतुर सन्न्यास के लिये कोई विशेष विधि नहीं है ॥ १५-१७ ॥ अल्प अन्न खाकर और एकान्त वास कर आसक्त हुई इन्द्रियों को विषयों से निवृत्त करना चाहिये ॥१८॥ ब्राह्मण प्रणव और व्याहृति से युक्त तीन ही प्राणायाम यदि यथाविधि करे, तो वही परम तप जानना चाहिये ॥ १९ ॥ जिस प्रकार अग्नि में तपानेसे धातु के मल जल जाते हैं उसी प्रकार प्राणायाम करने से इन्द्रियों के दोष नष्ट हो जाते हैं ॥ २० ॥ जब बिलकुल प्राण निकलते हों, वही काल आतुर संज्ञक है। दूसरा कोई आतुर काल मुक्तिमार्गप्रवर्तक नहीं है ॥ २१ ॥ आतुर सन्न्यास में भी उन उन मन्त्रों सहित मन्त्रावृत्ति कर विधिपूर्वक विद्वान् पुरुष सन्न्यास ग्रहण करे ॥ २२ ॥ आतुर सन्न्यास या क्रमसन्न्यास में प्रेषभेद कहीं नहीं है। कोई मन्त्र कर्मरहित नहीं है और हर एक कर्म मन्त्र

अकर्म मन्त्ररहितं नाऽतो मन्त्रं परित्यजेत् ।
मन्त्रं विना कर्म्म कुर्यात् भस्मन्याहुतिवद्भवेत् ॥ २४ ॥
विध्युक्तकर्मसंक्षेपात् सन्न्यासस्त्वातुरः स्मृतः ।
तस्मादातुरसन्न्यासे मन्त्रावृत्तिविधिर्मुने ॥ २५ ॥
आहिताऽग्निर्विरक्तश्चेद्देशान्तरगतो यदि ।
प्राजापत्येष्टिमप्स्वेव निवृत्त्यैवाऽथ सन्न्यसेत् ॥ २६ ॥
मनसा वाऽथ विध्युक्तमन्त्रावृत्त्याऽथवा जले ।
श्रुत्यनुष्ठानमार्गेण कर्मानुष्ठानमेव वा ॥ २७ ॥
आतुरस्य तु सन्न्यासे प्रेषमात्रं हि केवलम् ।
न श्राद्धादि न चाऽन्यत् स्याज्जलमध्यादिसर्पणम् ॥ २८ ॥
प्रेषं वक्तुमशक्तश्चेद्वाचाऽसौ मनसैव हि ।
प्रेषं कुर्यात्स्वयं धीरो मरणे समुपस्थिते ॥ २९ ॥
आतुराणां तु सन्न्यासे न विधिर्नैव च क्रिया ।
प्रेषमात्रं समुच्चार्य्य सन्न्यासं तत्र कारयेत् ॥ ३० ॥

की अपेक्षा रखता है ॥ २३ ॥ मन्त्ररहित कर्म्म अकर्म्म मात्र है, इसलिये मन्त्र का त्याग कभी नहीं करना चाहिये । मन्त्र के विना कर्म्म करना राख में आहुति देने के बराबर है ॥ २४ ॥ संक्षेप से सन्न्यास का विधियुक्त कर्म करने को आतुर सन्न्यास कहते हैं । इसलिये हे मुने ! आतुर सन्न्यास में भी मन्त्रावृत्ति की विधि है ॥ ॥ २५ ॥ अग्निहोत्री विरक्त होकर यदि देशान्तर में गया हुआ हो तो प्राजापत्येष्टि जल में ही निपटाकर उसे सन्न्यास ग्रहण कर लेना चाहिये ॥ २६ ॥ मन से यथाविधि मन्त्रावृत्ति करे अथवा जल में बैठ कर वेदोक्त मार्ग से यथाविधि कर्मानुष्ठान करे ॥ २७ ॥ आतुर सन्न्यास में केवल प्रेषमात्र है। न उसे श्राद्ध है और न जल में ही बैठना होता है ॥ २८ ॥ प्रेष कहने में अशक्त हो और प्राणोत्क्रमण का समय उपस्थित हो गया हो, तो धीर पुरुष स्वयं मानसिक वाणी से प्रेष कहे ॥ २९ ॥ आतुर सन्न्यास में न कोई विधि है और न कोई क्रिया है। केवल प्रेष का उच्चारण कर सन्न्यास कर देना

तनुं त्यजेद्धि यो विप्रः कृत्वा सन्न्यासमात्मवान् ।
मानसाद्वाचकाद्वाऽपि प्रेषादेवाऽत्र जायते ॥ ३१ ॥
कालान्तरेऽथवा सद्यो ब्रह्मलोकं स गच्छति ।
सन्न्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि ॥ ३२ ॥
न तत्क्रतुसहस्रेण फलं प्राप्नोति मानवः ।
सन्न्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि ॥ ३३ ॥
स सूर्यमण्डलं भित्त्वा ब्रह्मलोके महीयते ।
ब्रह्मणो मरणे तेन ब्रह्मणा सह धैर्य्यवान् ॥ ३४ ॥
महाभूतक्षये प्राप्ते परं ब्रह्माऽधिगच्छति ।
आपत्कालेतु सन्न्यासः कर्त्तव्य इति शिष्यते ॥ ३५ ॥
जरयाऽभिपलीतेन शत्रुभिर्व्यथितेन च ।
सन्न्यस्तत्रातुरो विप्रो यदि जीवति चेत्पुनः ॥ ३६ ॥
कर्त्तव्यः क्रमसन्न्यास आत्मश्रेयोऽभिकाङ्क्षिणा ।
ततो नैमित्तिकान्पितॄन्सन्तर्प्य विधिपूर्वकम् ॥ ३७ ॥

चाहिये ॥ ३० ॥ सन्न्यास ग्रहण कर जो ब्राह्मण शरीर छोड़ता है, और जिसका यहां पर मानसिक अथवा वाचनिक प्रेष हो जाता है, वह कालान्तर में अथवा तुरन्त ब्रह्मलोक को पहुँचता है। जब कण्ठ में प्राण आ जाते हैं, तब यदि कोई 'सन्न्यस्तं' इतना ही कह दे तो उस पुरुष को ऐसा फल मिलता है जो हजार यज्ञ करने से भी नहीं मिलता। मरने के समय यदि कोई 'सन्न्यस्तं' कहदे ॥ ३१-३३ ॥ तो वह सूर्यमण्डल को भेद कर ब्रह्मलोक में पहुँचता है। ब्रह्माजी के लय के समय में और महाभूतों का क्षय होते समय वह धीर पुरुष ब्रह्मा के साथ परब्रह्म को प्राप्त कर लेता है। आपत्काल में सन्न्यास लेलेना चाहिये, ऐसा भी कहा है ॥ ३४-३५ ॥ जरासे जर्जर होने के कारण अथवा शत्रु से पीड़ित होने के कारण आतुर सन्न्यास लेने पर भी यदि वह ब्राह्मण जी जाय, तो उस आत्म-कल्याण की चाहना करने वाले को फिर क्रमसन्न्यास ग्रहण कर लेना चाहिये। अनन्तर नैमित्तिक पितरों का विधिपूर्वक सन्तर्पण

नैमित्तिकाँस्तथा देवान्प्रसाद्य सन्न्यसेद्बुधः।
यतो वै दैवशक्तीनां पैतृकीणामिमे तथा ॥ ३८ ॥
प्रत्यक्षप्रतिनिधयः आम्नाता सकला अपि।
नैमित्तिकास्तु पितरो यावत्सप्तमपूरुषम् ॥ ३९ ॥
प्राधान्येनैव विज्ञेया देवा नैमित्तिकास्त्वमी।
कुलदेवा ग्राम्यदेवा वास्तुदेवा प्रधानतः ॥ ४० ॥
गुरोः पुरोधसश्चैव ज्ञानवृद्धनृणां तथा।
अध्यात्मसम्बन्धयुजामेतेषामपि तोषणम् ॥ ४१ ॥
कृत्वैव प्रव्रजेद्धीमान् चतुर्थेह्याश्रमे शुचिः।
यदि संस्कारशेषः स्यात्स्वयं स्वश्राद्धमाचरेत् ॥ ४२ ॥
कुटीचकस्तु सन्न्यासी योगसाधनसंयमौ।
अभ्यसेद्धि विशेषेण पञ्चसाकारब्रह्मसु ॥ ४३ ॥
कस्मिंश्चिद्यत्र मनसोरुचिरुग्राऽस्ति तस्य वै।
तस्मिन्रूपे सदा ध्यायन् ब्रह्मोपासनमाचरेत् ॥ ४४ ॥
आत्मीयकुलजातीनां सक्त्वा सम्बन्धमच्युत।
शरीरयात्रां निर्वोढुं धर्मात्मन्यात्मजे सति ॥ ४५ ॥

कर और नैमित्तिक देवताओं को प्रसन्न कर, उस विद्वान् को सन्न्यास ग्रहण कर लेना चाहिये। क्योंकि दैवी शक्ति और पैतृकी शक्ति के ये सब प्रत्यक्ष प्रतिनिधिस्वरूप माने गये हैं। नैमित्तिक पितर सात पुरुष तक प्रधानतया मानने चाहियें और नैमित्तिक देवों में कुलदेव, ग्राम्यदेव एवम् वास्तुदेव प्रधान हैं ॥ ३६-४० ॥ गुरु, पुरोहित, ज्ञानवृद्ध और अध्यात्मसम्बन्धयुक्त पुरुषों को सन्तुष्ट कर बुद्धिमान् पुरुष पवित्रता से चतुर्थाश्रम में प्रवेश करे। यदि उसके संस्कार शेष रह गये हों तो वह स्वयं अपना श्राद्ध करले ॥ ४१-४२। कुटीचक सन्न्यासी को विशेषतया योग साधन और संयम का अभ्यास करना चाहिये। पांच साकार ब्रह्म में से (अर्थात् सगुण पञ्च मूर्तियों में से) जिस में उसके मनकी उत्कट रुचि हो, उसी के रूप का सदा ध्यान कर उसे ब्रह्मोपासना करनी चाहिये ॥ ४३-४४ ॥ आत्मीय, कुल और जाति से सम्बन्ध त्याग

विस्तारे यत्नमादध्याद् व्रती भूत्वा निरन्तरम् ।
अस्यां दशायां सन्न्यासी उन्नतं लभते पदम् ॥ ७ ॥
जगद्गुरोः प्रतिनिधिर्महनीयं महर्षयः ।
दृष्टाऽनुश्रविकाभ्यां चेद्विषयाभ्यां यदा नृणाम् ॥ ८ ॥
परवैराग्यसम्प्राप्तिस्तदा हंसव्रतं चरेत् ।
पराभक्ते रहस्यं हि ज्ञात्वा साधकसत्तमः ॥ ९ ॥
तत्वज्ञानं चाऽनुभूय तदा हंसव्रतं चरेत् ।
उत्तरोत्तरमेतेषामाश्रमाणां विधारणे ॥ १० ॥
ज्ञानाऽधिकारप्राधान्यं न कालस्य प्रधानता ।
सन्न्यास्येतज्जगन्मान्यं धृत्वा हंसं महाव्रतम् ॥ ११ ॥
लभते ह्युत्तमां विप्राः ! पदवीं वै जगद्गुरोः ।
स निष्काम कर्मयोगव्रतं धृत्वा महीं चरन् ॥ १२ ॥
लोककल्याणकर्तारमुपदेशं ददत्तथा ।
दीक्षादानं महत्कुर्वन्नभयञ्च प्रचारयेत् ॥ १३ ॥
साधनानां परं तस्य राजयोगोऽस्ति साधनम् ।
तस्य व्रतमिदं ज्ञेयं निष्कामव्रतमेव हि ॥ १४ ॥

दृष्ट और आनुश्रविक विषयों से मनुष्य को जब पूर्ण वैराग्य प्राप्त हो जाता है, तब उसे हंस व्रत ग्रहण करना चाहिये । परा भक्ति के रहस्यको जान कर और तत्त्व ज्ञान का अनुभव करके साधकोत्तम हंस व्रत का ग्रहण करे । उत्तरोत्तर इन आश्रमों को ग्रहण करने में ज्ञान के अधिकार की प्रधानता है, कालकी नहीं । सन्न्यासी इस जगन्मान्य हंस के महाव्रत को धारण कर ॥ ५-११ ॥ हे विप्रो ! जगद्गुरु की उत्तम पदवी को प्राप्त करता है । वह निष्काम कर्म योगके व्रत को धारण कर पृथ्वीपर विचरण करता हुआ लोककल्याण करनेवाले उपदेश को देकर दीक्षादान स्वरूप महान् अभयदान का प्रचार करे ॥ १२-१३ ॥ उसके लिये साधनों में श्रेष्ठ साधन राजयोग है । उसका व्रत निष्काम व्रत ही जानना चाहिये ॥ १४ ॥ लोक

भिक्षेत्युक्त्वा सकृच्चूर्णीमश्नीयाद्वाग्यतः शुचिः ।
प्रक्षाल्यपाणिपादौ च समाचम्य यथाविधि ॥ ५२ ॥
आदित्ये दर्शयित्वाऽन्नं भुञ्जीत प्राङ्मुखोऽत्वरः ।
हुत्वा प्राणाहुतीः पञ्च ग्रासानष्टौ समाहितः ॥ ५३ ॥
आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरम् ।
अलाबुं दारुपात्रञ्च मृण्मयं वैणवं तथा ॥ ५४ ॥
चत्वारि यतिपात्राणि मनुराह प्रजापतिः ।
प्रदोषे परात्रे च मध्यरात्रे तथैव च ॥ ५५ ॥
सन्ध्यास्वह्नि विशेषेण चिन्तयेन्नित्यमीश्वरम् ॥ ५६ ॥
विष्णुश्चिदा यस्तु सता शिवः सन् ।
स्वतेजसाऽर्कः स्वधिया गणेशः ॥
देवी स्वशक्त्या कुशलं विधत्ते ।
कस्मैचिदस्मै प्रणतिः सदाऽऽस्ताम् ॥ ५७ ॥
त्रिपुरदलनदक्षश्चन्द्रखण्डावतंसः ।
कलितभसितलेपो हस्तविन्यस्तशूलः ॥

को जितना समय लगता है, उतने समय तक वह कुटीचक भिक्षु हरएक घर में नीचे सिर कर भिक्षा शब्द उच्चारण करके और पवित्रा पूर्वक मौनी होकर भिक्षा करे फिर हाथ पैर धोकर, यथाविधि आचमन कर और सूर्य को अन्न दिखा कर पूर्वाभिमुख बैठ शान्ति के साथ वह भिक्षा ग्रहण करे । पांच प्राणाहुतियों का हवन कर और आठ ग्रास लेकर पुनः आचमन करे एवम् ब्रह्माका तथा परमेश्वर का ध्यान करे । तुम्बीका, काठ का, मिट्टी का एवम् बाँस का ॥ ४९-५४ ॥ ये चार प्रकार के पात्र मनुप्रजापति ने यतियों के लिये कहे हैं । प्रदोष, परात्र, मध्यरात्र, सन्ध्या और विशेष कर दिन में प्रतिदिन ईश्वरचिन्तन करना चाहिये ॥५५-५६॥ विष्णु चित् शक्ति से, सदाशिव सत् शक्ति से, सूर्य अपने तेज से, श्रीगणेश अपनी बुद्धि से और देवी अपनी शक्ति से जगत् का कल्याण करती है, उन को सदा प्रणाम है ॥ ५७ ॥ जो त्रिपुरासुर को मारने में कुशल है, जिन्होंने अर्ध चन्द्र धारण किया है, भस्म-

कुटीचकस्तु गृह्णीयादन्नवस्त्रे ततोऽपि च ।
एतत्त्वाश्रमनिष्ठानां यतीनां नियतात्मनाम् ॥ ४६ ॥
भैक्षेण वर्तनं प्रोक्तं फलमूलैरथाऽपि वा ।
एककालं चरेद्भैक्ष्यं न प्रसज्येत विस्तरे ॥ ४७ ॥
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ।
सप्तागारं चरेद्भैक्षमलाभे द्वे पुनश्चरेत् ॥ ४८ ॥
प्रक्षाल्यपात्रे भुञ्जीयादद्भिः प्रक्षालयेत्तु तत् ।
अथवाऽन्यदुपादाय पात्रं भुञ्जीत नित्यशः ॥ ४९ ॥
भुक्त्वा च संत्यजेत्पात्रं यात्रामात्रमलोलुपः ।
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ॥ ५० ॥
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ।
गोदोहमात्रं तिष्ठेत कालं भिक्षुरधोमुखः ॥ ५१ ॥

कर शरीर यात्रा का निर्वाह करने के लिये, यदि धर्मात्मा पुत्र हो, तो उस से भी कुटीचक अन्न वस्त्र ले सकता है । ऐसे आश्रमनिष्ठ नियतात्मा यतियों को भिक्षा वृत्ति से अथवा फलमूल खाकर रहने की आज्ञा है। उसे भिक्षा भी रात दिन में एक वार और थोड़ी* ग्रहण करनी चाहिये ॥ ४५-४७ ॥ क्योंकि भिक्षा में आसक्ति होने से यति विषयों की ओर प्रवृत्त होता है । सात घर भिक्षार्थ फिरना चाहिये और इतने पर यदि भिक्षा न मिले तो दो घर और भी जाना चाहिये ॥ ४८ ॥ धोये हुए पात्र में वह भोजन करे और पश्चात् उस पात्र को पुनः जल से धो डाले । अथवा नित्य नवीन पात्र लाकर उसमें भोजन करे । केवल शरीर यात्रार्थ भोजन कर उस पात्र को निर्लोभ होकर फेंक दे। जिस गृह में धुआँ न निकलता हो, मूसल न बजता हो, अङ्गार न देख पड़ते हों, जहां के लोगों का भोजन होगयासा हो और पत्तल बाहर फेंक दिये हों वहां प्रतिदिन यति को भिक्षार्थ जाना चाहिये । गोदोहन

* थोड़ी कहने से तात्पर्य यह है कि जो अष्टप्रहर के लिये पर्याप्त हो और अति भोजन भी न हो।

अधिसलिलधितल्पीकृत्य शेषं शयानो ।
द्रुहिणमभिनुवन्तं नाभिपद्मे दधानः ॥
चरणयुगलमङ्के क्लृप्तवानिन्दिरायाः ।
सजलजलदकान्तिः पातु नारायणो वः ॥ ६२ ॥
स्वस्वाकाशादिभूतप्रकृतिगुणयुजां साधकानां विमुक्त्यै ।
ब्रह्मैवैकं स्वमायाशबलितमभवत्पञ्चदेवात्मकं तत् ॥
नामाकारक्रियाभिर्वियदिव न भिदा वस्तुतोऽस्तीति तत्त्वम् ।
एकं पञ्चाऽपि पञ्चैकमपि बुधजनाः शान्तिसौख्यं भजन्तु ॥ ६३ ॥
एषु पञ्चसु रूपेषु यस्य कस्याऽपि निश्चितम् ।
गुरुणैवोपदिष्टेषु ध्यानं कुर्य्याद्यतात्मवान् ॥ ६४ ॥
सच्चिदेकं ब्रह्म इति रूपेण मुनिपुङ्गव ! ।
व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च ॥ ६५ ॥
एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते ।
उपेत्य च स्त्रियं कामात्प्रायश्चित्तं समाहितः ॥ ६६ ॥

॥ ६१ ॥ जो समुद्र में शेषशैया पर शयन किये हैं, जिन्होंने विनीत ब्रह्मा को नाभिकमल में धारण किया है और जिनके चरणों की सेवा लक्ष्मीजी कर रही हैं, वे घननील नारायण आपको पावन करें ॥ ६२ ॥ आकाशादि पञ्चमहाभूतों की प्रकृति के गुणों से युक्त अपने अपने साधकों की मुक्ति के लिये एकही ब्रह्म अपनी माया से युक्त होकर पञ्च देवात्मक हो गया है । नाम आकार और क्रियाओं से यद्यपि पांचों भिन्न प्रतीत होते हैं तथापि वस्तुतः आकाश की तरह वे एक ही हैं । अतः पांचों को एक और एक को ही पांच जानकर बुधजन शान्ति सौख्य का लाभ करें * ॥ ६३ ॥ हे मुनि श्रेष्ठ ! इन पांचों रूपों में जिस किसी का उपदेश गुरु ने किया हो, उसका ध्यान सच्चिदेक ब्रह्मरूप से एकाग्र होकर करना चाहिये।सन्न्यासियों के जो व्रत और उपव्रत हैं उनमें से एक का भी यदि अतिक्रम हो जाय तो प्रायश्चित्त होता है । कामेच्छा से यदि

---

* ये मन्त्र योगोक्त पञ्चोपासना के स्थूल ध्यान हैं ।

प्राणायामसमायुक्तं कुर्यात्सान्तपनं शुचिः ।
ततश्चरेत नियमान् कृत्स्नान् संयतमानसः ॥ ६७ ॥
पुनराश्रममागत्य चरेद्भिक्षुरतन्द्रितः ।
न नर्मयुक्तमनृतं हिनस्तीति मनीषिणः ॥ ६८ ॥
तथापि न च कर्त्तव्यः प्रसङ्गो ह्येष दारुणः ।
एकरात्रोपवासश्च प्राणायामशतं तथा ॥ ६९ ॥
उक्त्वाऽनृतं प्रकर्त्तव्यं यतिना धर्मलिप्सुना ।
परमापद्गतेनाऽपि न कार्य्यं स्तेयमन्यतः ॥ ७० ॥
स्तेयादभ्यधिकः कश्चित नास्त्यधर्म इति स्मृतिः ।
हिंसा चैषा परा तृष्णा या चाऽऽत्मज्ञाननाशिका ॥ ७१ ॥
यदेतद्द्रविणं नाम प्राणास्ते तु बहिश्चराः ।
स तस्य हरते प्राणान्यो यस्य हरते धनम् ॥ ७२ ॥
एवं कृत्वा स दुष्टात्मा भिन्नवृत्तौ व्रतच्युतः ।
भूयो निर्वेदमापन्नश्चरेच्चान्द्रायणं व्रतम् ॥ ७३ ॥

वह स्त्री के निकट जाय, तो प्रायश्चित्त कर प्राणायाम युक्त सान्तपन करे तब वह शुद्ध होगा। फिर वह सन्न्यासी संयमी हो पुनः अपने आश्रम में आकर निरलसभाव से समस्त नियमों का पालन करे। हे मनीषियो! यद्यपि हंसीमें झूठ बोलना पापजनक नहीं होता है, तथापि सन्न्यासी को ऐसा दारुण प्रसङ्ग कभी नहीं आने देना चाहिये। एक रात्र उपवास और सौ प्राणायाम झूठ बोलने के प्रायश्चित्तार्थ धर्मात्मा यति को करने चाहिये। परम आपत्ति में पड़ने पर भी कभी चोरी नहीं करनी चाहिये॥ ६४–७०॥ ऐसा कहा है कि चोरी से बढ़कर कोई अधर्म नहीं है। हिंसा, अत्यन्त तृष्णा और याञ्चा आत्मज्ञान को नाश कर देती है ॥ ७१ ॥ द्रव्य वालेका द्रव्य उसके बहिस्थित प्राणरूप है। यदि कोई किसी का धन अपहरण करे तो वह धन नहीं, उसके प्राण ही हरण करता है ॥ ७२ ॥ चोरी करने से वह दुष्टात्मा भिन्न वृत्ति और व्रत से च्युत होता है; उसे लज्जित होकर चान्द्रायण व्रत करना चाहिये॥७३॥ यह व्रत शास्त्रोक्त

विधिना शास्त्रदृष्टेन सम्वत्सरमिति श्रुतिः ।
भूयो निर्वेदमापन्नश्चरेद्भिक्षुरतन्द्रितः ॥ ७४ ॥
अकस्मादपि हिंसां तु यदि भिक्षुः समाचरेत् ।
कुर्यात्कृच्छ्रातिकृच्छ्रन्तु चान्द्रायणमथापि वा ॥ ७५ ॥
स्कन्देदिन्द्रियदौर्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि ।
तेन धारयितव्या वै प्राणायामास्तु षोड़श ॥ ७६ ॥
दिवा स्वप्ने त्रिरात्रं स्यात्प्राणायामशतं तथा ।
एकान्ने मधुमांसे च नवश्राद्धे तथैव च ॥ ७७ ॥
प्रत्यक्षलवणे चोक्तं प्राजापत्यं विशोधनम् ।
ध्याननिष्ठस्य सततं नश्यते सर्वपातकम् ॥ ७८ ॥
तस्मान्महेश्वरं ध्यात्वा तस्य ध्यानरतो भवेत् ।
यद्ब्रह्म परमं ज्योतिः प्रतिष्ठाक्षयमक्षयम् ॥ ७९ ॥
योऽन्तरात्मा परं ब्रह्म स विज्ञेयो महेश्वरः ।
एष देवो महादेवः केवलं परमेश्वरः ॥ ८० ॥
तदेवाऽक्षयमद्वैतं तदादित्यान्तरं परम् ।
यस्मान्महीयते देवः स्वधाम्नि ज्ञानसंज्ञिते ॥ ८१ ॥

विधि से एक वर्ष पर्यन्त करे और संकोच के साथ निरलस होकर भ्रमण करे ॥ ७४ ॥ सन्न्यासी यदि अकस्मात् हिंसा करे, तो उसे कृच्छ्रातिकृच्छ्र अथवा चान्द्रायण व्रत करना चाहिये ॥ ७५ ॥ स्त्री को देखकर इन्द्रिय की दुर्बलता के कारण यति का वीर्यपात हो, तो उसे सोलह प्राणायाम करने चाहिये ॥ ६ ॥ दिन में यदि सोवे तो तीनरात्र सौ प्राणायाम करे । एकही का अन्न ग्रहण करे, मद्य मांस भक्षण करे अथवा नवश्राद्ध में जाय ॥ ७७ ॥ या प्रत्यक्ष लवण खाय तो उसकी शुद्धि के लिये प्राजापत्य व्रत करे । ध्याननिष्ठ के सब पातक नष्ट होजाते हैं । इसलिये महादेव का ध्यान कर उन्हीं के ध्यान में उसे रत होजाना चाहिये । क्योंकि वही परम ज्योतिर्मय ब्रह्मप्रतिष्ठाका स्थान और कभी क्षय होनेवाला नहीं है ॥ ७९ ॥ जो अन्तरात्मा है, वही परब्रह्म महेश्वर है । वही देवाधिदेव केवल परमेश्वर है ॥ ८० ॥ वही अक्षय और अद्वैत है, वही परम

आत्मयोगाह्वये तत्त्वे महादेवस्ततः स्मृतः।
नाऽन्यं देवं महादेवाद् व्यतिरिक्तं प्रपश्यति ॥ ८२ ॥
तमेवात्मानमन्वेति यः स याति परं पदम्।
मन्यन्ते ये स्वमात्मानं विभिन्नं परमेश्वरात् ॥ ८३ ॥
न ते पश्यन्ति तं देवं वृथा तेषां परिश्रमाः।
एकमेवपरं ब्रह्म विज्ञेयं तत्त्वमव्ययम् ॥ ८४ ॥
स देवस्तु महादेवो नैतद्विज्ञाय बध्यते।
तस्माद्यत्नेन नियतं यतिः संयतमानसः ॥ ८५ ॥
ज्ञानयोगरतः शान्तो महादेवपरायणः।
एष वः कथितो विप्रा यतीनामाश्रमः शुभः ॥ ८६ ॥
पितामहेन प्रभुणा मुनीनां पूर्वमीरितः ॥ ८७ ॥

इति श्रीसन्न्यासगीतायां कुटीचकधर्मनिरूपणं
नाम सप्तमोऽध्यायः।

ज्योति आदित्य में निहित है। क्योंकि ज्ञान संज्ञक अपने धाम में वही देव पूजे जाते हैं ॥ ८१ ॥ आत्मयोग नामक तत्त्व में महादेव ही कहे गये हैं। महादेव के अतिरिक्त दूसरा कोई देव नहीं देखा जाता ॥ ८२ ॥ जो उनको अपने आत्मा में खोजता है, वही परम पद को प्राप्त करता है। अपने आत्मा को जो परमेश्वर से भिन्न मानते हैं। वे उस देव को नहीं देख सकते। उनका परिश्रम व्यर्थ है। परब्रह्म एक ही है इस अव्यय तत्त्व को जान लेना चाहिये ॥ ८३-८४ ॥ और वह देव महादेव ही है यह जान लेने पर कोई बद्ध नहीं होता। इसलिये बड़े यत्न के साथ संयमी सन्न्यासी नियमित रूप से ज्ञान योग में रत और शान्त चित्त से महादेव परायण होजावे। यह मैंने हे विप्रो! यतियों के शुभ आश्रम का वर्णन किया है, जो पहिले मुनियों के स्वामी ब्रह्मा ने कहा था ॥ ८५-८७ ॥

इस प्रकार सन्न्यासगीता का कुटीचकधर्मनिरूपण नामक
सप्तम अध्याय समाप्त हुआ।

शुक उवाच ।

ज्ञानिनामग्रणीः ! ब्रह्मन् ! श्रुतोऽस्माभिः सविस्तरः ।
कुटीचकस्य धर्मोऽयं विशिष्टस्त्वदनुग्रहात् ॥ १ ॥
बहूदकस्य यो धर्मो विशिष्टः समुदाहृतः ।
श्रावयाऽस्मानिदानीं त्वं भक्तानुग्रहकारकः ॥ २ ॥

याज्ञवल्क्य उवाच ।

कुटीचकस्तु सन्न्यासी पूर्वलक्षणलक्षितः ।
त्रिभिरेव हि वर्षैस्तु स बहूदकतां श्रयेत् ॥ ३ ॥
तत्त्वज्ञानेऽग्रसरतां विना किन्तु न तामियात् ।
बहूदकस्य धर्मेषु विशिष्टानि मुनीश्वराः ॥ ४ ॥
सर्वप्रधानानि तथा लक्ष्यानीमानि यानि वै ।
विश्वात्मना समं स्वस्य चैक्ये यत्नो विशेषतः ॥ ५ ॥
जगद्ब्रह्म स्वरूपं वै ज्ञात्वा निष्कामकर्मकृत् ।
केवलं स भवेन्नित्यं व्रतेऽस्मिन्निरतः शुचिः ॥ ६ ॥

श्री शुकदेव जी बोलेः-हे ज्ञानियों में अग्रणी ब्रह्मन् ! आप के अनुग्रह से हमने कुटीचक का उक्त विशेष धर्म्म सविस्तर सुना ॥ १ ॥ अब आप बहूदक का जो विशेष धर्म्म कहा गया है वह हमलोगों को सुनाइये क्योंकि आप भक्तों पर अनुग्रह करनेवाले हैं ॥ २ ॥

महर्षि याज्ञवल्क्य बोलेः-पूर्वोक्त लक्षणों से युक्त कुटीचक सन्न्यासी तीन वर्षों के बाद बहूदक धर्म का आश्रय करे ॥ ३ ॥ परन्तु वह यदि तत्त्वज्ञान में अग्रसर न हुआ हो तो तीन वर्ष बीत जाने पर भी उसे बहूदक नहीं होना चाहिये । हे मुनीश्वरो ! बहूदक धर्म के सर्वप्रधान और विशिष्ट लक्ष्य संक्षेप से निम्न लिखित हैं ! बहूदक को विश्वात्मा के साथ अपना ऐक्य करने का विशेष रूप से यत्न करना चाहिये ॥ ४-५ ॥ जगत् को ब्रह्म स्वरूप जान कर पवित्र भाव से केवल निष्काम कर्म के व्रत में उसे निरन्तर निरत रहना चाहिये ॥ ६ ॥

पूर्णतायास्तथा लाभः त्यागे तपसि यत्नतः ।
अनिकेतः स्थिरमतिस्तथा च दृढसंयमी ॥ ७ ॥
न केषुचिदभिष्वङ्गो कश्चनापि हि कुत्रचित् ।
तीर्थयात्राटनं चैव समासेन निबोधत ॥ ८ ॥
कामिनीकाञ्चनाभ्यां हि वैराग्यं मनसा यदि ।
पूर्णं नैवोपलब्धं चेन्न बहूदकतां श्रयेत् ॥ ९ ॥
संस्कारो ममतायाश्चेत्स्वजातिकुलबन्धुषु ।
न पूर्णो मनसा नष्टो न बहूदकतां श्रयेत् ॥ १० ॥
आत्मन्येव स्थितौ पूर्णा यदीच्छा नोपजायते ।
कदापि विप्रो धर्मज्ञो न बहूदकतां व्रजेत् ॥ ११ ॥
कुटीचकस्य यत्त्वाहुर्मनसा पूजनं सदा ।
देवर्षिनित्यपितॄणां यच्चाहुर्वै ह्यमन्त्रकम् ॥ १२ ॥
जगत्कल्याणबुद्ध्यैव महायज्ञविधानकम् ।
सर्व्वमेतच्च संप्रोक्तं ब्रह्माण्डस्यात्मना सह ॥ १३ ॥
ज्ञेयं तन्मुनिभिर्निरमैक्यसम्बन्धवर्द्धकम् ।
तयोर्बहूदकस्याऽस्ति न निषेधो न वा विधिः ॥ १४ ॥

यत्नपूर्वक त्याग और तप में पूर्णता लाभ करना चाहिये । गृहहीन, स्थितप्रज्ञ और दृढ़संयमी हों। कहीं भी किसी में भी कोई भी आसक्ति न रह जाय । और तीर्थयात्राटन किया करे ॥ ८ ॥ कामिनी काञ्चन से यदि मन में पूर्ण वैराग्य उत्पन्न न हुआ हो तो बहूदक धर्म का आश्रय नहीं करना चाहिये ॥ ९ ॥ अपनी जाति, कुल और बन्धुवर्ग के सम्बन्ध की ममता का संस्कार यदि हृदय से नष्ट न हुआ हो तो बहूदक नहीं होना चाहिये ॥ १० ॥ आत्मा में ही अवस्थिति करने की यदि पूर्ण इच्छा न हो तो धर्मज्ञ ब्राह्मण कदापि बहूदक धर्म में प्रवेश न करे ॥११॥ कुटीचक के लिये मानसिक पूजन और देव, ऋषि और नित्य पितृगण का जो अमन्त्रक पूजन कहा गया है, वह जगत्कल्याण की बुद्धि से महायज्ञ विधायक है। यह सब ब्रह्माण्ड के साथ आत्मा का ऐक्य सम्बन्ध बढ़ाने के लिये मुनियों ने कहा है ऐसा जान लेना चाहिये । इन दोनों में से बहूदक के

सङ्कल्पमोहरहितो यस्मात्स परिकथ्यते ।
किन्त्वाश्रमागतानां वै धार्म्मिकाणान्तु सत्कृतिः ॥ १५ ॥
शिष्टाचारेण कर्तव्या सर्व्वैः सन्न्यासिभिः सदा ।
मर्य्यादां पालयन्न्यासी वर्णाश्रमविधेर्ध्रुवम् ॥ १६ ॥

जगत्कल्याणबुद्ध्या वै शिष्टाचारपरो भवेत् ।
वाङ्मात्रेण नमस्कर्ता निम्नवर्णजुषां सताम् ॥ १७ ॥

साधूनामाश्रमाप्तानां इति शास्त्रविनिर्णयः ।
सैश्वर्य्यायाः स्थूलमूर्तेर्ब्रह्मणः परमेशितुः ॥ १८ ॥

ध्यानेन यदि तृप्तः स्यात्सन्न्यासी तु वहूदकः ।
ज्योतिर्ध्यानेऽथवा विन्दुध्याने कुर्याद्रतिं सदा ॥ १९ ॥
निर्गुणाया धारणाया ध्यानमेतत्सहायकम् ।
कृत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ॥ २० ॥

आत्मानं सर्वभूतानां परत्वात्तमसः स्थितम् ।
सर्वस्याधारमव्यक्तमानन्दं ज्योतिरव्ययम् ॥ २१ ॥

लिये किसी का विधिनिषेध नहीं है ॥ १२-१४ ॥ क्योंकि वह सङ्कल्प और मोह रहित है । किन्तु अपने आश्रम अर्थात् आसन पर आये हुए धार्मिकों का सत्कार शिष्टाचारके साथ सभी संन्यासियों को करना चाहिये। वर्णाश्रम धर्म्म की मर्य्यादा पालन करने के लिये संन्यासी को जगत्कल्याण की बुद्धि से शिष्टाचारपरायण होना चाहिये । आश्रम पर आये हुए निम्न वर्ण के सज्जन साधुगण को केवल मौखिक नमस्कार करना चाहिये ऐसा शास्त्र का निर्णय है । ऐश्वर्य युक्त परब्रह्म की स्थूल मूर्ति के ध्यान से यदि वहूदक सन्न्यासी तृप्त हो गया हो तो उसे ज्योतिर्ध्यान अथवा विन्दुध्यान का अभ्यास करना चाहिये ॥ १५-१९ ॥ ये ध्यान ही निर्गुण धारणा के परम सहायक हैं । हृदयकमल में विश्वसंज्ञक, विश्वसंभव, सर्व भूतों के आत्मास्वरूप, अन्धकार से परे स्थित, सबके आधारस्वरूप, अव्यक्त, आनन्दमय, ज्योतिर्मय, अव्यय, प्रधानपुरुषातीत, आकाश-

प्रधानपुरुषातीतमाकाशं दहनं परम् ।
तदन्तः सर्वभावानामीश्वरं ब्रह्मरूपिणम् ॥ २२ ॥
ध्यायेदनादिमद्वैतमानन्दादिगुणालयम् ।
महान्तं परमं ब्रह्म पुरुषं सत्यमव्ययम् ॥ २३ ॥
सिततराऽरुणाकारं महेशं विश्वरूपिणम् ।
ओंकारान्तेऽथवात्मानं संस्थाप्य परमात्मनि ॥ २४ ॥
आकाशे देवमीशानं ध्यायीताकाशमव्ययम् ।
कारणं सर्वभूतानां आनन्दैकसमाश्रयम् ॥ २५ ॥
पुराणं पुरुषं शम्भुं ध्यायन्मुच्येत बन्धनात् ।
यद्वा गुहायां प्रकृतौ जगत्सम्मोहनालये ॥ २६ ॥
विचिन्त्य परमं व्योम सर्वभूतैककारणम् ।
जीवनं सर्वभूतानां यत्र लोकः प्रलीयते ॥ २७ ॥
आनन्दं ब्रह्मणः सूक्ष्मं यत्पश्यन्ति मुमुक्षवः ।
तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ॥ २८ ॥

रूप और श्रेष्ठ अग्नि के रूप में ब्रह्म स्वरूप, अनादि, अद्वैत, आनन्दादि गुणों के आलय, महान् परम-ब्रह्म-पुरुष, सत्य, अव्यय और सब भावों के ईश्वर का ध्यान करना चाहिये † ॥ २०–२३ ॥ श्याम और अरुण स्वरूप विश्वरूप महेश को ॐकार में अथवा आत्मा को परमात्मा में स्थापन कर आकाश में आकाश रूप, अव्यय, ईश्वर, देव का ध्यान करना चाहिये । जो सब भूतों का कारण और आनन्द का एक मात्र आश्रयस्थान है । उस पुराणपुरुष शम्भु का ध्यान करने से बन्धन छूट जाते हैं । * अथवा गुहा, प्रकृति, और जगत्सम्मोहनालय के सम्बन्ध से परमव्योम, सर्वभूतों का कारण, सर्व भूतों का जीवन–जहाँ सभी लोग विलीन होते हैं–आनन्दमय ब्रह्म का सूक्ष्मरूप–जिसे मुमुक्षुगण देखते हैं–उसकी चिन्तना कर

---

† यह हठयोग के अनुसार ज्योतिर्ध्यान का प्रकरण है ।

* यह लय योग के अनुसार बिन्दुध्यान का प्रकरण है ।

अनन्तं सत्यमीशानं विचिन्त्यासीत संयतः।
गुह्याद्गुह्यतमं ज्ञानं यतीनामेतदीश्वरम् ॥ २९ ॥
योऽनुतिष्ठेत सततं सोऽश्नुते योगमीश्वरम्।
तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः ॥ ३० ॥
ज्ञानं समभ्यसेद्ब्राह्मं मुच्यते भवबन्धनात्।
यद्वा पृथक्त्वमात्मानं सर्वस्मादेव केवलम् ॥ ३१ ॥
आनन्दमक्षरं ज्ञानं ध्यायीत च पुनः परम्।
यस्माद्भवन्ति भूतानि यद्गत्वा नेह जायते ॥ ३२ ॥
स तस्मादीश्वरो देवः परस्ताद्योऽधितिष्ठति।
यदन्तरे तद्गमनं शाश्वतं शिवमव्ययम् ॥ ३३ ॥
यमाहुस्तत्परो नाऽस्ति स देवः स्यान्महेश्वरः।
शृणुध्वं ऋषयः सर्वे वेदवेदाङ्गपारगाः ॥ ३४ ॥
कालो दुरत्ययः प्रोक्तस्तस्मादुपगते कलौ।
तत्प्रभावात्प्रजाः सर्वा वर्णसङ्करतां तथा ॥ ३५ ॥

उसमें निहित केवल ज्ञानलक्षण, अनन्त, सत्य, ईश्वरीय ब्रह्म का विचार करते हुए संयत होकर रहना चाहिये। यतियों के लिये श्रेष्ठ, गुह्य से भी गुह्य इस ज्ञान का जो अनुष्ठान करता है, वह ईश्वरीय योग को प्राप्त करता है। इसलिये नित्य ध्यानरत और आत्मविद्यापरायण होकर ब्रह्मज्ञान का अभ्यास करने से सब बन्धन छूट जाते हैं। अथवा सब से पृथक्, केवल, आनन्द, अक्षर, अद्वितीय, ज्ञान स्वरूप आत्मा का ध्यान करना चाहिये। जिससे प्राणिमात्र उत्पन्न होते हैं और जहाँ पहुँच कर वे पुनः उत्पन्न नहीं होते अर्थात् मुक्त हो जाते हैं, वही देव ईश्वर है। उनसे भी परे जो स्थित हैं, जिस में उसका गमन शाश्वत, कल्याणमय, अव्यय होता है और जिस से परे कुछ नहीं है, वही देव महेश्वर कहे गये हैं* वेद वेदाङ्गों में पारङ्गत समस्त ऋषियों! सुनिये ॥ २४–३४ ॥ काल बड़ा प्रबल कहा गया है। जब कलिकाल आजायगा, तब उसके प्रभाव से पृथ्वी पर

* ये दो ध्यान राजयोग के अनुसार ईश्वर और ब्रह्म इन दोनों भावों से सम्बन्ध युक्त दो पृथक् ध्यान हैं। ईश्वर ध्यान तटस्थवेद्य और ब्रह्मध्यान स्वरूपवेद्य होने से राजयोग के अनुसार ये अलग अलग ध्यान माने गये हैं।

कर्म्मसङ्करतां चाऽपि प्रायो यास्यन्ति भूतले।
ब्राह्मणव्यतिरिक्ता ये ततो वर्णाः कलौ तदा॥ ३६॥
प्रव्रज्यां धारयिष्यन्ति निवृत्तेरिच्छुकास्तथा।
परिहारो नास्ति यस्य कालिकी गतिरीदृशी॥ ३७॥
यदि कालप्रभावेण ब्राह्मणेतरवर्णकाः।
निवृत्तिमभिकाङ्क्षेरन् तदा पालनतत्पराः॥ ३८॥
कुटीचकस्य धर्म्मस्य भवेयुस्ते निरन्तरम्।
तथा बहूदकस्याऽपि धर्मस्येति विनिर्णयः॥ ३९॥
धर्मो हंसस्य परमहंसस्याऽपि न युज्यते।
अन्यथा पतनं तेषां भावीति शास्त्रसम्मतम्॥ ४०॥
तथाऽवद्ध्युस्ते नित्यं लोकरक्षाकरी यथा।
वर्णधर्मस्य मर्यादा न लुप्येत कथञ्चन॥ ४१॥
मनसा तेऽधिकारं हि महान्तमपि कञ्चन।
कीदृशं चाऽपि लभ्येरन् शरीरेण तु नित्यशः॥ ४२॥

समस्त प्रजा प्रायः वर्णसङ्कर और कर्मसङ्कर हो जायगी। ब्राह्मण के अतिरिक्त सभी वर्ण निवृत्तिमार्ग के इच्छुक होकर सन्न्यास ग्रहण करने लगेंगे। इस बात का परिहार नहीं हो सकता क्योंकि काल की गति ही ऐसी है॥ ३५-३७॥ कलिकाल के प्रभाव से ब्राह्मणेतर वर्ण जब निवृत्ति की इच्छा करेंगे और निवृत्ति धर्मका पालन करने में तत्पर हो जायंगे, तब उन्हें केवल कुटीचक और बहूदक धर्म का ही पालन करना चाहिये। हंस और परमहंस के धर्म का पालन उनके लिये योग्य नहीं है। वे यदि ऐसा करें अर्थात् हंस या परमहंस बनें तो शास्त्रों के मत से उनका निश्चय पतन होगा॥ ३८-४०॥ उन्हें लोकरक्षाकरी वर्ण धर्म की मर्यादा का सदा ध्यान रखना चाहिये। उसका लोप नहीं होने देना चाहिये॥ ४१॥ वे अपना मानसिक कैसा ही महान् अधिकार क्यों न प्राप्त करलें,

वर्णधर्म्मानुसारेण वर्त्तेरन् विनयान्विताः ।
स्वोच्चवर्णस्य मर्यादाविचारं च पुनः पुनः ॥ ४३ ॥
हृदि संस्थापयेयुस्ते स्वीयामुन्नतिमिच्छवः ।
निम्नवर्णभवास्ते वै स्वोच्चवर्णेन पूजनम् ॥ ४४ ॥
न कारयेयुः कथमप्युच्चवर्णाय ते तथा ।
न चापि दीक्षां दद्युर्वै श्रुतिस्मृतिवचस्त्विदम् ॥ ४५ ॥
वर्णं पृष्टाः केनचित्ते गोपयेयुः कथञ्चन ।
न हि स्ववर्णं यस्माद्वै मूलमाहुर्महर्षयः ॥ ४६ ॥
वर्णाश्रमस्य धर्मं हि आर्यत्वस्य दृढं ध्रुवम् ।
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ॥ ४७ ॥
सिद्धिमेकस्य संपश्यन् न जहाति न हीयते ।
अतिवादाँस्तितिक्षेत नावमन्येत कञ्चन ॥ ४८ ॥
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ।
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥ ४९ ॥

